शुद्धबुद्धस्वभावस्य तव केनापि देहगेहादिनाहंकारममकारास्पदेन न संगोऽस्ति अतः शुद्धअसंगस्त्वं
किं त्यक्तुं किमुपादातुं चेच्छसि तस्मात्संघातस्य देहस्य विलयं कुर्वन्नाह देह इति निरस्यन् कुर्वन्नेवमेव
देहादिनिरसनरूपमेव लयं व्रज १ उदेतीति हे शिष्य भवतः सकाशाद्विश्वमुदेति भवदभिन्नमेव
यथा वारिधेः सकाशात् बुद्बुदो वारिधेरभिन्न एवोदेति इत्येवं प्रकारेण एकं सजातीयादिभेद
रहितमात्मानं ज्ञात्वा एवमेव एकात्मज्ञानमेव लयं व्रज २ ननु प्रत्यक्षतोऽभिन्नतया हारसर्पादि
भेदप्रतीयमानी कथं हारादिविलय इत्यत आह प्रत्यक्षमिति प्रत्यक्षमपीदं व्यक्तं विश्वममले त्व

उदेति भवतो विश्वं वारिधेरिव बुद्बुदः इति ज्ञात्वैकमात्मानमेवमेव लयं व्रज २
प्रत्यक्षमप्यवस्तुत्वाद्विश्वं नास्त्यमले त्वयि रज्जुसर्प इव व्यक्तमेवमेव लयं व्रज ३
समदुःखसुखः पूर्ण आशानैराश्ययोः समः समजीवितमृत्युः सन्नेवमेव लयं व्रज ४

यि नास्त्येव [illegible] अवस्तुत्वाद्रज्जुभुजंगवत् तस्मादेवमेव लयं व्रजेति द्वितीयस्य हेयो
पादेयस्यैवाभावादित्यर्थः ३ समेति पूर्णश्चासौ आनंदपूर्णस्त्वमत एव देववशात् द्वन्द्वयोः सुखदुः
खयोः समः इच्छानिच्छयोश्च समस्तथा जीवितमृत्योर्वा समो निर्विकारः सुखदुःखादीनामना
त्मधर्माणां ज्ञानात्संघातानां तं सुखदुःखादिषु समो भूत्वा दृष्टिरूपलयं व्रजेत्यर्थः ४ इति श्री
महेश्वरविरचितायामष्टावक्रटीकायां लयचतुष्टयं नाम पंचमं प्रकरणं ५ ॥ ॥

गुरुणैवं परीक्षार्थमुपदिष्टे लये सति पूर्णात्मनो लयादीनां शिष्यो ऽसंभवमब्रवीत् १ न देवं गुरुणा सतपरी
क्षार्थं लययोगमुपदिष्टे सति लयाय भावोपपादके श्री आत्मज्ञानमनुवदन्नेव शिष्यः पूर्णात्मनो लयायसंभव
माह चतुर्भिः श्लोकैः आकाशवदिति अहमात्मा आकाशवदनन्तः न चानंतस्यात्मनो देहादिनिवासः क
थमित्यत आह घटवदिति प्राकृतं प्रकृतिकार्यं जगद्देहादिकं घटवत् तथा चात्मनो देहादेरेकदेशाव
च्छेदकं एवं मोनुषवद्घटादेरित्यर्थः इति तथा समस्यात्मनो नंतत्वे समेतस्यात्मनः त्यागो ग्रहणं लयश्च
न संभवति परिच्छिन्नस्य घटादेस्त्यागग्रहणादिदर्शनादित्यर्थः १ घटाकाशदृष्टान्ते देहात्मनो भेदशंकास्या

आकाशवदनन्तो ऽहं घटवत्प्राकृतं जगत् । इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः १ ॥
महोदधिरिवाहं स प्रपंचो वीचिसंनिभः । इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः २ ॥
अहं स शुक्तिसंकाशो रूप्यवद्विश्वकल्पना । इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः ३ ॥
अहं वा सर्वभूतेषु सर्वभूतान्यथो मयि । इति ज्ञानं तथैतस्य न त्यागो न ग्रहो लयः ४ ॥

दित्यपरितोषादाह महोदधिरिति स्पष्टं २ समुद्रवीचिदृष्टान्ते देहात्मनो विकार्यविकारिशंका स्यादित्य
परितोषादाह अहं स इति स्पष्टं ३ शुक्तिदृष्टान्ते प्यात्मनि परिच्छिन्नत्वशंका स्यात्तत्राह तत्त्वार्थमाह अ
हमिति अहं वा अहमेव सर्वभूतेषु प्रकृतिप्राकृतिकेषु सत्तास्फूर्तिप्रदत्वेनास्मि अतो हेतोः सर्वभूता
न्यधिष्ठानभूते मयि वर्तन्त इति ज्ञानं वेदान्तसिद्धं तथा सत्येतस्यात्मनस्त्यागादिकं न संभवतीत्यर्थः ४
इति श्रीमहेश्वरविरचितायामष्टावक्रटीकायां शिष्यप्रोक्तं अनुभवचतुष्टयं नाम षष्ठं प्रकरणं ८ ॥ ॥

अथ सप्तमाणमाह इतीति इत्येवं वेदान्तसिद्धं ज्ञानमतो ज्ञानात्मथाभावश्लोके त्वर्थः ॥ ५ उवाच

ननु लययोगाभावे संसारवृत्तेर्निरंकुशप्रसरः स्यादित्याशंक्य तस्यानिष्टत्वाभावमनुभवप्रपंचकेनोत्तरमा
हाशिष्यः लययोगाननुष्ठानेव्यवहारेनिरंकुशे आशंक्य शिष्यस्तोल्लासादब्रवीद्गुरुमुत्तरं मयीति मय्या
त्मनि अनंते महासमुद्रे विश्वाख्यः पोतः नौका स्वान्तवातेन मनःपवनेन इतस्ततो भ्रमति अत्र मम अस
हिष्णुता असहनता नास्ति समुद्रस्येव नौकापरिभ्रमणे इत्यर्थः १ जगद्व्यवहारस्यानिष्टत्वाभावः सर्व
मुक्तः अथ जगदुदयापगमयोरपि नानिष्टत्वमित्याह मयीति मयि आत्मनि अनंते विनाशरहिते महा
ति व्यापके अंभोधौ समुद्रे जगदाख्या वीची स्वभावतः स्वपनादिस्वभावादुदेतु वा अपरमस्तु मा याति तस्य

मय्यनंतमहांभोधौ विश्वपोत इतस्ततः । भ्रमति स्वांतवातेन न ममास्त्यसहिष्णुता १
मय्यनंतमहांभोधौ जगद्वीची स्वभावतः । उदेतु वास्तमायातु न मे वृद्धिः न च क्षतिः २ हानिः
मय्यनंतमहांभोधौ विश्वं नाम विकल्पना । अतिशांतो निराकार एतदेवाहमास्थितः ३
आत्मा भावेषु नो भावस्तत्रानंते निरंजने । इत्यसक्तोऽस्पृहः शांत एतदेवाहमास्थितः ४

न तत उदये वृद्धिः नास्ति व्यापकत्वात् तदपगमे च क्षतिः नास्ति अनंतत्वादित्यर्थः २ सर्वदृष्ट्यात्मनो
जगद्विकार इति भ्रमः स्यात् तद्वारणार्थमाह मयीति मयि अनंते महांभोधौ नाम प्रसिद्धं विश्वं कल्पनामा
त्रमेव न तु तात्त्विकं अतः कारणात् अहम् अतिशांतः प्रपंचोपलब्धरहितः अत्र हेतुमाह निराकार इति एत
दात्मज्ञानमेव अहम् आस्थितः आश्रितेन तु लययोगेन सापेक्षमेव हर्षितवान् ३ अतिशांतत्वं स्पष्टय
ति आत्मेति आत्मा भावेषु देहादिषु आदेयतया नास्ति व्यापकत्वात् भावो देहादिः तत्र आत्मनि नास्ति
निरंजनत्वात् इति कारणात् अहम् असक्तः संगरहितो न एवास्पृहः इच्छादिधर्मासंश्लिष्टः शांत इत्य

॥ अष्टावक्रगीता ॥ ४ ॥ ओं

अ॰ ८

इच्छादिरहितत्वे हेतुमवतरन्नाह अहो इति अहो इत्याश्चर्यं स्वरूपमलौकिकं चिन्मात्रमेवाहं जगत्सर्वं प्रपंच
जातं इंद्रजालोपसंदर्शनकालेपि पृथक्सत्तारहितं अतो विश्वस्य पृथक्सत्तारहितत्वान्मम सक्तत्व ९
स्त्वनि कथं केन कारणेन हेयोपादेयबुद्धिः स्यान्न कुत्रापीत्यर्थः ५ इति श्रीमद्विश्वेश्वरविरचितायाम
ष्टावक्रटीकायामनुभवपंचकविवरणं सप्तमं प्रकरणं ७ इत्थं परीक्षिततत्त्वज्ञानं शिष्यमेवाभिनंदितं गुरुः
बंधमोक्षस्वव्यवस्थां सम्यगब्रवीत् तदेव सप्तभिः प्रकरणैः स्वशिष्यं सम्यक्परीक्ष्य बंधमोक्षव्यवस्थानि

ग्राहिणी

अहो चिन्मात्रमेवाहमिंद्रजालोपमं जगत् अतो मम कथं कुत्र हेयोपादेयकल्पना ५ इत्य॰
नुभवपंचकं ॥ तदा बंधो यदा चित्तं किंचिद्वांछति शोचति किंचिन्मुंचति गृह्णाति किंचिद्धृष्यति
कुप्यति १ तदा मुक्तिर्यदा चित्तं न वांछति न शोचति न मुंचति न गृह्णाति न हृष्यति न कुप्यति २
तदा बंधो यदा चित्तं सक्तं कास्वपि दृष्टिषु तदा मुक्तिर्यदा चित्तमसक्तं सर्वदृष्टिषु ३ ॥

दूषणव्याजेन गुरुः स्वशिष्यानुभवमभिनंदति चतुर्भिः श्लोकैः तदेति हे शिष्य अतो मम कथं कुत्र हेयो
पादेयकल्पना इत्युक्तं त्वया तत्त्वयोक्तं तत्तथैव यतश्चित्तं यदा वांछादिविकारवद्भवति तदैव जीवस्य बंधः इत्य
र्थः तदा मुक्तिरिति यदा चित्तं वांछादिविक्रियातीतं तदा मुक्तिरित्यर्थः २ तदेवं पृथक् बंधमोक्षा
वुक्त्वा अथ समुच्चयेन बंधमोक्षावाह तदा बंध इति यदा चित्तं कास्वपि नाना दृष्टिषु संसक्तं तदा बंधः य
दा चित्तं सर्वास्वपि नाना दृष्टिषु संसक्तं तदा मोक्ष इत्यर्थः ३ ॥ १४

स्त्वबाधितानुवृत्त्याद्वयपदायमाना सर्वापि विषयदृष्टिस्तथाप्यहंकारनिवृत्तौ मोक्षस्तदनुवृ
त्तौ बंध इति वदन्नेव शिष्योक्तमर्थमभिनंदितमनुवदति यदा नाहमिति यदाहमित्येवंरूपः अथ
मोध्यासोऽनर्थमूलभूतो निवर्तते तदा मोक्षः यदा च सोऽनुवर्तते तदा बंधनमिति तावाहे लयाना
यासेनैव हेयोपादानादिक्रियाणामकर्तात्मास्मि अकर्त्रात्मज्ञानेन कर्तृत्वाभिमानो ध्वस्ता इ
दितिभावः ४ इतिश्रीमहेश्वरविरचितायामष्टावक्रटीकायां गुरुप्रोक्तं बंधमोक्षव्यवस्थाप्र
करणं अष्टमं ८ शिष्योक्तानुभवस्यैव दार्ढ्यार्थं गुरुणोच्यते निर्वेदः सप्तमष्टाभिरिच्छादित्यजना

यदा नाहं तदा मोक्षो यदाहं बंधनं तदा मत्वेति हेलया किंचिन्मा गृहाण विमुंच मा ४ ६

निर्हठात् तिबंधमोक्षव्यवस्थाष्टकमष्टमप्रकरणं ८ कृताकृते च द्वंद्वानि कदा शांतानि कस्य वा एवं ज्ञा
त्वेह निर्वेदाद्भव त्यागपरोऽव्रती १ कस्यापि तात धन्यस्य लोकचेष्टावलोकनात् जीविते
ज्ञोनेच्छा च्छा बुभुत्सा च बुभुक्षोपशमं गता २ त्वकः १ सत्वेतिहेलया किंचिन्मा गृहाण विमुंच सेतिय

इक्षेनत्रकिंहारमिसंपेत्ता यो गुरुरनुमोदनमद्वया वैराग्याष्टकमाह कृतेति कृताकृते इदं कर्तव्यमि
दमकर्तव्यमित्यभिनिवेशो द्वंद्वानि सुखदुःखादीनि कस्य कदा वा शांतानि कस्यचिदपि न कस्यापि
शांतानि एवं ज्ञात्वा इह कृतादिषु निर्वेदादभिनिवेशादिपरित्यागादेव त्यागपरो भव कीदृशस्त्वमव्र
ती नास्ति व्रतं कृत्याकृत्यग्रहो यस्य सः १ चिन्तयर्मत्यागरूपो निर्वेदस्तु कस्यचिदेव धन्यस्य नत्वसर्वस्येत्याह
कस्यापीति हे तात शिष्यसहस्रेषु मध्ये कस्यचिदेव धन्यस्य अन्यनिर्विण्णा शून्यरूपलोकचेष्टावलोकनात्
जीविते च्छा भोगेच्छा ज्ञानेच्छा दयउपशमं गताः इदं तु नाटकमानि वेदं संपन्नं शिष्यमानंदयितुमेवो

अ॰ १५

नतुत्तानि नां सर्वेच्छोपघ्नामः किंहेतुक इत्यत आह अनित्यमिति इदं दृश्यमानं सर्वं प्रपंचजातमनित्यं
चैतन्मेः प्यलं तथाहि एकीसत्तेन दृष्टसमाणं नसत् आध्यात्मिकाधिदैविकाधिभौतिकतापत्रितयदू
षितं अतएव असारं तुच्छं अतएव हेयं इष्टश्रुतं तथा नैवादरणीयमिति निश्चित्य तानी प्राप्मति जन्म
पि इच्छां न कुरुते २ इहदानामारभ्य कर्मवशात् दृश्यमाविना नेच्छां निच्छां विहाय यथाप्राप्तमभो
गीमुक्तिमाप्नुयादित्याह कोसाविति यन्नर्तृणां हदानि हवड्ः एतादीनि नमति अशोकः कालः किंवा
वात्सादिवयो लक्षणं शरीरावस्थाश्रपितन्न्कापी ति विचार्य नानिदहाम्नुपेक्ष्यतन्नेच्छां मनिच्छामः

अनित्यं सर्वमेवेदं तापत्रितयदूषितं असारं निंदितं हेयमिति निश्चित्य शाम्यति ३ मौज्ञं
अंत्रेपेक्ष्य कोसौ कालो वयः किंवाय न्नेहदानिनो नृणां नाम्नुपेक्ष्य यथाप्राप्तवर्ती सिद्धिमवाप्नुयात् ४
नानामतं महर्षीणां साधूनां योगिनां तथा दृष्ट्वा निर्वेदमापन्नः कोनशाम्यति मानवः ५

कृत्वा यथाप्राप्तेषु अनासक्त यथावर्ती सिद्धिंमुक्तिं अवाप्नुयादित्यर्थः ४ तर्कशास्त्रादिज्ञानेषु निष्ठान
कृत्वा नानाविप्रतिपत्तिदर्शनान्नापि कर्मसु नापि अष्टांगयोगादिष्वित्याह नानामतमिति महर्
मे॰ षीणां [illegible]नमज्जैमिनिप्रभृतीनां मतं नानाविधं अपरिच्छिन्नं दृष्ट्वा तर्कशास्त्रादिभ्यो निर्वेदमापन्न
स्तथा साधूनां कर्मनिष्ठानां मतं नानाविधं केचि[illegible]के विद्वामपराः केचिज्जपपराः के
चित्कृच्छ्रचांद्रायणपरा इति नानाविधं दृष्ट्वा कर्मभ्यो निर्वेदमापन्नस्तथा योगिनां मतं नानाविधं के
चिदष्टांगयोगपराः केचिन्महदादि प्रसंख्यानपरा इति नानाविधं दृष्ट्वा अष्टांगयोगादिभ्यो निर्वेदमाप १५

केवलज्ञाननिष्ठामेवाश्रित्य कर्मादिकं साकल्यं विसाह कृत्वेति निर्वेदसमतायुक्त्या निर्वेदो नाम विषयानासक्तिस्तथाश
त्रुमित्रेषु समानता सर्वत्रात्मबुद्धिर्युक्तिर्नाम सत्वयाह कस्त्वं कीयन्तः चेतनस्य सच्चिदानंदस्य मूर्तिपरिज्ञाने स्वरूप
साक्षात्कारं कृत्वानंदनंतरं नास्तिक श्रिकृत्य यस्य सन किं गुरुः एवंविधो यः संसृतेः सकाशादात्मानं तारयति ६ चेत
नस्य स्वरूपज्ञानोपायमाह पश्येति हे शिष्य भूतविकारान् देहेंद्रियादीन् यथार्थतस्त्वं ततः भूतमात्रान् पश्यन्नत
आत्मस्वरूपान् पश्यसि तत्क्षणाद्बंधनिर्मुक्तः शरीराहंभावनिर्मुक्तः सन् शरीरादिविविक्तात्मस्वरूपस्थो भवि
ष्यसि शरीरादावनात्मतया ज्ञाते सति तत्साक्षित्वेन आत्मा कूटस्थ इति संज्ञेय इति भावः ७ नन्वेवमात्मनि ज्ञातेपि
तत्रनिष्ठा कथं स्यादित्याशंक्य वासनात्यागादित्याह वासना इति वासना विषयवासना एव संसार इति कारणात्तन्ना

कृत्वा मूर्तिपरिज्ञानं चैतन्यस्य न किं गुरुः निर्वेदसमतायुक्त्या यस्तारयति संसृतेः ६ ॥
पश्य भूतविकारांस्त्वं भूतमात्रान्यथार्थतः तत्क्षणाद्बंधनिर्मुक्तः स्वरूपस्थो भविष्यसि ७
वासना एव संसार इति सर्वा विमुंच ताः तत्त्यागो वासनात्यागात्स्थितिरद्य यथा तथा ८ ॥
विहाय वैरिणं काममर्थं चानर्थसंकुलं धर्ममप्येतयोर्हेतुं सर्वत्रानादरं कुरु १ ॥

वासनास्त्वं मुंच वासनात्यागाच्चात्मनि निष्ठायां सत्यां तत्संसारस्य त्यागः स्यादित्यर्थः अद्य अधुना वासनात्यागे सति
स्थितिर्यथा तथा यथा प्रारब्धं तथास्त्वित्यर्थः ८ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां निर्वेदाष्टक
विवरणं नवमं प्रकरणं ९ विषयाणाममभावेपि तुष्टिः निर्वेदः इति ततः तन्निरूप्यार्थं च विषये वैतृष्ण्यं शांति
रीर्यते १ विषये विनापि संतोषरूपो निर्वेदः प्रागुक्तः अथेदानीं विषयतृष्णोपशममभिनंदन्नष्टावक्रो गुरु
रुदाहरति विहायेति कामं वैरिणं ज्ञानशत्रुं विहाय तथा अनर्थसंकुलं अर्जने रक्षणे व्यये वा अनेकशो दुःख
संकुलमर्थं विहाय तथा एतयोः कामार्थयोरनर्थयोर्हेतुं धर्ममपि विहाय सर्वत्र त्रिवर्गहेतुकर्मसु अनादरं कु

अ॰ ९

ननु मित्रक्षेत्रादि फलके भुक्ते कथमनादरः स्यात् प्रोक्तमित्रादीनामप्यनित्यत्वमाह स्वप्नेति हे शिष्य मित्रादि सं
पदः स्वप्नेन्द्रजालवत्पश्य यतो दिनानि त्रीणि पञ्च वा स्थायिन्य इत्यर्थः २ सर्वत्रानादरः कृत इति तेनोक्ते वैराग्य
पुरुषार्थहेतुत्वमाह यत्र यत्रेति यत्र यत्र येषु येषु प्रसिद्धेषु विषयेषु तृष्णा भ[illegible]वेत्तमेव संसारं विद्धि
विषयतृष्णाया एव कर्मद्वारा संसारहेतुत्वेनानर्थत्वात् अतः प्रौढवैराग्यं स्थैर्यं श्रीमद्भावमाश्रित्य वीततृष्णः सुखी भव
प्राप्ते अर्थे इच्छारहितः सन्नात्मनिष्ठया सुखी भवेत्यर्थः ३ अमुमेवार्थं भंग्यन्तरेणाह तृष्णामात्रेति तृष्णा
मात्रस्वरूप एव बन्धः कर्मद्वारा बन्धहेतुत्वात् तन्नाशस्तृष्णानाश एव मोक्षो निवृत्तिहेतुत्वात् तन्नाशो मोक्ष

स्वप्नेन्द्रजालवत्पश्य दिनानि त्रीणि पञ्च वा मित्रक्षेत्रधनागारदारदायादिसंपदः २ ॥
यत्र यत्र भवेत्तृष्णा संसारं विद्धि तत्र वै प्रौढवैराग्यमाश्रित्य वीततृष्णः सुखी भव ३
तृष्णामात्रात्मको बन्धस्तन्नाशो मोक्ष उच्यते भवासंसक्तिमात्रेण प्राप्तितुष्टिर्मुहुर्मुहुः ४
त्वमेकश्चेतनः शुद्धो जडं विश्वमसत्तथा अविद्यापि न किंचित्सा का बुभुत्सा तथापि ते ५

इत्यत्र हेतुमाह भवेति भवतीति भवो देहादिविषयस्तत्र देहादिसंगाभावमात्रेण मुहुः मुहुः वारंवारं प्रा
प्तितुष्टिः आत्मप्राप्तिजः संतोषः स्यादतस्तृष्णानाश एव मोक्ष इत्यर्थः प्राप्तिस्तुष्टिरिति पाठे प्राप्तिः स्यात्तु
ष्टिश्च स्यादित्यर्थः ४ ननु बुभुत्सारूपा तृष्णा कथं त्यज्येति तत्र शंकामाह त्वमेक इति इह जगति त्रय एव पदा
र्थाः आत्मा जगत् अविद्या च तत्र आत्मा तावत् त्वमेवैकश्चेतनः शुद्धोनन्तो विद्धि त्वं इति स्वात्मानमेवैकं प्र
तीत्वा नान्यत्र बुभुत्सा युक्ता नापि जगत् बुभुत्सा च युक्ता जगतः असत्त्वात् जडत्वाच्च नापि अवि
द्या बुभुत्सा युक्ता तस्या अपि सदसद्विलक्षणरूपा निर्वचनीयत्वात् तथा तव बुभुत्सापि का युक्ता न कापि इद

सीतमिश्रा

8

= ॥ ९

जडं विषमसदृशं तदुक्तं तद्विघटयति राज्यमिति राज्यादीनि सर्वाणि संसक्तस्यापि शान्तिं कुर्वाणस्या
पि तवजन्मनि जन्मनि नानाजन्मसु तत्र स्थानी तृतो विषमसहितं तदर्थः ८ बुभुत्स्यापि नकेतव्यमिति शान्तु
पितवजन्मनिजन्मनिनानाजन्मसु तृष्णाजनी मतो विषमसहितं तदर्थः ८ बुध्यस्यापि न केतव्यमिति श्रान्तु
न्तु अथ धर्मार्थकामेष्वपीच्छा न कार्येत्याह अलमिति अर्थादिना अलं अर्थकामधर्मेषु इच्छा न कार्ये
तदर्थः अथ हेतुमाह वपुरिति यत्कारणात्त्वत्संसारकान्तारे संसारवनलक्षणे दुर्गमे वर्त्मनि श्रान्तस्त्व
दभ्यः अर्थादिभ्यः विश्रान्तिर्भ्रमणे विशिष्टोनाम्नः दतोर्थादि न त्यानकेतव्यमतदर्थः २ तत्स्यायाउप
शमः शान्तत्वः अथ किम्मोक्षोपशममाह कृतमिति हे शिष्य आयासदं प्रयासप्रदं शुभं तदेव दुःख
शमः शान्तक्तः अथ किस्मा क्षोपशममाह कृतमिति हे शिष्य आयासदं प्रयासप्रदं शुभं तदेव दुःखं

भार्यया राज्यं सुताः कलत्राणि शरीराणि सुखानि च संसक्तस्यापि नष्टानि तव जन्मनि जन्मनि ९ ॥
अलं धर्मेण कामेन सुकृतेनापि कर्मणा एभ्यः संसारकान्तारे न विश्रान्तमभून्मनः ॥
कृतं न कति जन्मानि कायेन मनसा गिरा दुःखमायासदं कर्म तदद्याप्युपरम्यताम् ॥

अलमिति

निर्वेदे

स्वपशमाष्टकं ८ भावाभावविकारश्च स्वभावादिति निश्चयी निर्विकारो गतक्लेशः सुखे
कर्मकायादिना कति जन्मानि न कृतं अपि तु यावदद्य भावीन सर्वजन्मसु अपि कृतं कर्मणा तत्र यानर्थं
एवलब्धस्तत्र स्मादद्यापि अधुना कर्मभ्य उपरम्यतां ८ इति श्रीमहेश्वरविरचितायामष्टावक्रटी
कायां गुरुशिष्य उपशमाष्टकं दशमं प्रकरणं १० उक्तार्थं ज्ञातिं विना ज्ञानं विना कस्यापि न जायते
ति निश्चितमेवाह गुरुः ज्ञानाष्टकं १ उक्तार्थं ज्ञातिं विज्ञानादेव ज्ञानं तन्मयेति वाथ यति तेज्ञाना
ष्टकमाह तत्रादौ ज्ञानसाधनानि श्राह भावाभावेति भावाभावरूपो विकारः स्वभावान्मायातत्सं
स्कारादेव जायते न तु निर्विकारादात्मन इति निश्चयवान् गुरुणो निश्चयबलात् एवं सुखेनैव श्रनाया

पतीश्वरी
विरामः

ग्र॰ ९

ननु मायासंबन्धान्तत एव कथं भावाभावविकाराः स्युः इत्याशंक्याह ईश्वर इति ईश्वर एव सर्वनिर्माता नान्यो जीवः ईश्वरपर ॥
वशत्वात् इति निश्चयी पुरुषो निश्चयवशाद् देवान्न गलितसर्वान्तस्तः अत एव शान्तो निश्चलचित्तः सन् क्वापि न सज्जते २
नन्वीश्वर एव चेत् सर्वनिर्माता तर्हि कश्चिद् दरिद्रः कश्चिद् धनी लब्धः पि कश्चित् सविनः कश्चिद् दुःखी नोरचयत
त्वात् स्यात् वैषम्यनैर्घृण्ये स्यातामित्याशंक्याह आपद इति काले समयविशेषे आपदः संपदश्च दैवात् प्राक्कृतादृष्टाद् देव
त्वात् वैषम्यनैर्घृण्ये स्यातामित्याशंक्याह आपद इति काले समयविशेषे आपदः संपदश्च दैवात् प्राक्तनादृष्टाद् दैवे
स्तस्य वैषम्य नैर्घृण्यपि स्यातामित्याशंक्याह ... अत एव निमसमस्त इन्द्रिया विषयान्नाकाङ्क्षति नियः श्रमेन
स्वरपरिया चिन्ता दैवे निश्चयी अत एव तत् मोचीन तत्त्वः अत एव निमस्तेन्द्रियो विषयान्नाकाङ्क्षेद्भियः श्रमेन
वाञ्छति न नष्टं न शोचतीत्यर्थः ३ ननूक्तनिश्चयवतो न पि कर्माणि कुर्वन्नेव दृष्यत इत्याशंक्याह सुखेति कर्मफ
सर्वकर्ता ईश्वरः सर्वनिर्माता नेहान्य इति निश्चयी अन्तर्गलितसर्वाशः शान्तः क्वापि न सज्जते २ आपदः संप
निर्मलेन्द्रियः दः काले दैवादेवेति निश्चयी तृप्तः स्वस्थेन्द्रियो नित्यं न वाञ्छति न शोचति ३ सुखदुःखे जन्ममृत्यू
रागरहितः ॐ प्रोति दैवादेवेति निश्चयी साध्यादर्शी निरायासः कुर्वन्नपि न लिप्यते ४ चिन्तया जायते दुःखं नान्यथेहेति
निश्चयी तया हीनः सुखी शान्तः सर्वत्र गलितस्पृहः ५ नाहं देहो न मे देहो बोधोहमिति नि
श्चयी कैवल्यमिव संप्राप्तो न स्मरत्यकृतं कृतं ६ ॥
लब्धं तत् सुखादिकं दैवादृष्टाद् देवेति निश्चयी अत एव मया इदं फलं साध्यमिति दर्शी अत एव निरायासः श्रमरहितः
प्रारब्धवशात् कुर्वन्नपि न लिप्यते कर्मजन्यं न छिभागी न भवति कर्तृत्वाभ्यासरहितत्वादित्यर्थः ४ ननु कुर्वन्नेव कथं
निरायास इत्याशंक्याह चिन्तयेति इह दुःखं चिन्तया जायते नान्यथेति निश्चयी अत एव तया चिन्तया हीनः अत
एव शान्तः स्थिरान्तःकरणः अत एव सर्वत्र सुखतत्साधनयोर्गलितस्पृहः पुरुषः सुखी भवतीत्यर्थः ५ उक्त
साधनैः सिद्धज्ञानिनो दशां निरूपयति नाहमिति अहं देहो न तथा मे देहो न किं तु नित्यबोधोहमिति ज्ञानवशाद्
देहादौ निवृत्ताहंममाभिमानो देहादिना कृतमकृतं मया कृतं नमिति न स्मरति यथा कैवल्यं विदेहकैवल्यं प्राप्तः कृ ९

आत्मस्वेति ब्रह्मणो हिरण्यगर्भमारभ्य तृणस्तम्बपर्यन्तं सर्वं जगदहमेवेति प्रसन्न निष्प्रपञ्चात्मपुरुषः निर्विकल्पः सं
कल्पविकल्पशून्यो न एव शुचिः विषयसंगरूपमलरहितं अत एव शान्त निश्चलान्तःकरणो न एव ग्रामाग्रामयोर्वि
षययोर्निवृत्तः परमसन्तोषवानात्मानन्दपूर्णत्वादित्यर्थः ७ नन्वात्मज्ञानी कथं निर्विकल्पादिरूपपरमार्थग्रा
ह नानेति अधिष्ठानसाक्षात्कारेणाध्यस्तबाधे सति नानाभूतं सर्वं विश्वं जगत् न किंचिद्विशेषव्यवहारगोचर एव पश्यतीति निवृत्त
तिनिष्प्रपञ्चीपुरुषो निवृत्तवासनः केवलचिद्रूपः सन् न किंचिदपि विशेषव्यवहारं स्वप्नवन्निवृत्तेरित्यर्थः ८ इतिश्रीमद्धिमेश्वर विरचितायां
कार्यकारणोपाधिर्भवति न वस्तुतो न सर्वेषामपि स्वप्नवन्निवृत्तेः न किंचिद्विशेषं पश्यति नन्वासिद्धमपि ... वदति सां
मेकादशप्रकरणं ११ गुरुरुवाच तज्ज्ञानेन किंचिद्विशेषं पश्यति निर्विकल्पः शुचिः शान्तः ग्रामाग्रामविनिर्वृत्तः ७ नानाश्र
आब्रह्मस्तम्बपर्यन्तमहमेवेति निष्प्रपञ्ची निर्विकल्पः शुचिः शान्तः ग्रामाग्रामविनिर्वृत्तः ७ नानाश्च
यमिदं विश्वं न किंचिदिति निष्प्रपञ्ची निर्वासनः स्फूर्तिमात्रो न किंचिदिव पश्यति ८ इत्येकादशः ॥
कायकृतान्यसहस्राणि एकत्वमेव वाहमास्थितः १ श्री
कायकृतासहस्रं न तोवाग्विलसितसहः अथाविनासहस्रस्मादेवमेवाहमास्थितः २ राम ॥
सम्भावेनपादादेरदृश्यत्वेन चात्मनः विक्षेपैकाग्रहृदय एवमेवाहमास्थितः तत्र प्रथमेका
पते १ उक्तं नानाष्टकेन किंचिदिव पश्यति तद्वत्त्वशिष्यः स्वस्मिन्विशुद्धयेतमेवमेवाष्टकमाह तत्र कायेक
यवामनसां व्यापारो परममाह कायेति अहं पूर्वमपि कायिकरूपकर्मासहस्रतो हेतोर्वाग्विलसितसहः जपक
र्मासहः अथातो मनोव्यापाररूपाया चिन्तायाः सहस्रस्माद्धेतोः एवमेव निर्व्यापार एव अहमास्थितः अस्माम
येऽस्थित इत्यर्थः १ उक्तं व्यापारत्रयापरमहेतुं वदन्नेवोक्तमनुवदति प्रीत्यभावेनेति तानिस्फलजनकस्याप्र
हादेः शब्दकार्यकर्मणः मध्ये प्रीत्यभावेन प्रीतिविषयत्वेन यात्मनस्थापद्दृश्यत्वेन निर्विषयविक्षेपणाष्टकाय
हृदयः निमध्यमपदलोपी बहुव्रीहिसमासः हिविस्फलजनकस्य जपादेः प्रीतिविषयत्वाज्जपादिरूपो मम
नास्ति आत्मनश्चादृश्यमानत्वात् ध्यानादिविषयत्वाच्चिन्तारूपोऽपि विक्षेपो ममनास्तीत्यर्थः अत एव मेवस्वरूपेणैव अ
४

ननु तथापि समाध्यर्थं व्यवहारः कर्तव्य इत्याशंक्याह समाध्यासादिभिः कर्तृत्वभोक्तृत्वाद्यनर्थाध्यासादिभिर्विक्षि
प्तो ऽसतां तन्निरासार्थं समाधये व्यवहारो नास्त्येवेति नियमं विलोक्य शुद्धात्मज्ञानेन मयि मायाध्यासाभावादेव समा
धिशून्य एवाहमास्थितः ३ हेयेति हेयं त्याज्यं दृश्यं नो मम हेयोपादेयवस्तुनो विरहात् अत एव मम मनाग्विकारे
ण हर्षविषादयोरप्यभावात् हे ब्रह्मन् गुरो अद्य अधुना अहमेवमेवास्थित इत्यर्थः ४ आश्रमेति आश्रमानाश्र
मं ध्यानं च तथा नतश्च युक्तं चित्तं स्वीकृतं चित्तवर्जनं च एते त्रिभिरेव मम मनसा विकल्पा विकल्पं वीक्ष्य अहमेवमेत
त्त्रितयरहित एवास्थितः ५ कर्मेति यथैव कर्मानुष्ठानमज्ञानात्तथैवोपरमः कर्मोपरमोऽपि अज्ञानादेवे

समाध्यासादिविक्षिप्तो व्यवहारः समाधये एवं विलोक्य नियममेवमेवाहमास्थितः ३ हेयो-
पादेयविरहादेवं हर्षविषादयोः अभावादद्य हे ब्रह्मन्नेवमेवाहमास्थितः ४ आश्रमाश्र
मध्यानं चित्तस्वीकृतवर्जनात् विकल्पं मम वीक्ष्यैतैरेवमेवाहमास्थितः ५ कर्मानुष्ठानमः
ज्ञानाद्यथैवोपरमस्तथा बुद्ध्वा सम्यगिदं तत्त्वमेवमेवाहमास्थितः ६ अचिंत्यं चिंत्यमा
नोऽपि चिंतारूपं भजत्यसौ त्यक्त्वा तद्भावनं तस्मादेवमेवाहमास्थितः ७ एवमेव कृतं येन स
कृतार्थो भवेदसौ एवमेव स्वभावो यः स कृतार्थो भवत्यसौ ८ इत्येवमेवाष्टकं ॥ ॥ ॥

देत्सम्यक् यथार्थं तत्त्वं बुद्ध्वा अहमेव कर्म तदुपरमरहित एवास्थितः ६ अचिंत्यमिति अचिंत्यं ब्रह्मेति चिंत्यमानोऽप्ययं
सो ऽयमात्मचिन्तालक्षणं रूपं भजति तस्मात्तेन तद्भावनाम् अचिंत्यं ब्रह्मेति भावनां त्यक्त्वा अहमेव भावनारहित ए
वास्थितः ७ एवमेवेत्यवस्थायाः साधकोऽपि श्रेष्ठः किं पुनस्तत्स्वभाव इति कैमुतिकन्यायेनाह एवमेवेति
येन एवमेव सर्वक्रियारहितमेव स्वरूपं साधनवशात्कृतं सोऽसौ कृतार्थो भवेत् यस्तु एवमेव स्वभावः सोऽ
सौ कृतार्थो भवतीति किं वक्तव्यमित्यर्थः ८ इति श्रीमहेश्वरविरचितायां द्वादशं प्रकरणं १२ ॥ ॥
एवमेवेत्यवस्थायाः फलीभूतां स्वस्थितिं प्राह शिष्यः स्फुटीकर्तुं अहमासे यथासुखं १ गम ॥ १८

२१

अथैवमेवंभवस्थायाः फलीभूतां मदवस्थां स्वकीयां विषदयितुमाह अकिंचनेति अकिंचनभवं
सर्वसंगाभावप्रभवं स्वास्थ्यं विनष्टस्थैर्यं कौपीनं नैव पिकौपीनाख्यवस्त्रावपिंडं नैभं अस्मात्कारणात्
अहं मागादानं विहाय मागादानं योगासक्तिं विहाय यथास्तवमनतिक्रम्याहमासेनकदाचित्
भीमर्थः १ ऊर्ध्वापीति ऊर्ध्वापिधारी श्वकर्मणि कायस्य खेदः ऊर्ध्वापि वाचिककर्मणि जिह्वा विषय
ते ऊर्ध्वापिध्यानादिकर्मणि मनः खिद्यते अतो हेतोः तं त्रयमपि मत्क्वाऽस्त्वेवं यथास्यात्तथा पुरुषार्थे
स्वात्मन्येवास्थितः २ ननु कायवाङ्मनोव्यापारत्यागे देहपवसमः पतेत भोजनाद्युपानादेरपि
अकिंचनभवं स्वास्थ्यं कौपीनं नैव पिंडं नैभं त्यागादानं विहायास्मादहमासे यथासुखं १
ऊर्ध्वापि खेदः कायस्य जिह्वा ऊर्ध्वापि विषये मनः ऊर्ध्वापितन्मत्क्वा पुरुषार्थे स्थितः सुखं २
13 यँत कृतं किमपि नैव स्यादिति संचिंत्य तत्वतः यदा कर्तुमायाति तत्कृत्वासे यथासुखं ३
कर्मनैष्कर्म्यनिर्बंधभावादेहस्य योगिनः संयोगवियोगविरहादहमासे यथासुखं ४
अर्थानर्थौ न मे स्थित्या गत्या वा शयनेन वा तिष्ठतो गच्छतः स्वपतस्तस्मादहमासे यथासुखं ५
त्यागादिमाह कृतमिति शरीरेंद्रियादिभिः कृतं किमपि नैव तत्त्वात्मकृतं न स्यादिति संचिंत्य
दायच्छरीरादिकर्म कर्तुमायाति तन्देहकारम्भेन कृत्वा अहं यथासुखमासे ३ ननु कर्म
वा नैष्कर्म्यं वा यत्नकर्तव्यं निष्ठा वक्ष्यप्रसक्तेः कार्या पुरुषार्थस्थितेत्याशंक्याह कर्मेति कर्मनैष्कर्म्य
निर्बंधभावाः स्वभावादेहस्य योगिनो देहासक्तयोगिन एवाहं न देहसंयोगादेहसंयोग
विरहादपि यथासुखमासे न यथाचंमममदेहाय संगाभावान्न कर्मनैष्कर्म्यनिर्बंधस्तथाः ४
अथ लौकिकव्यापारेपि ममनिर्बंधस्याह अर्थेति ममस्थित्यागत्याहिनासा अनर्थानर्थौ

नतः श्रीमद्दर्शितात्मसादनात्ज्ञानि
छनाछेन स्वपन्वा अहं यथासुखमासे ५॥

स्वनि

अ॰ १९

एवं तदेव भंग्यंतरेणाह स्वपत इति स्वपतो यत्नरहितस्य मेम मनागपि फलवत स्य मम सिद्धिर्ना
स्ति अस्मात्कारणात्यत्नाय त्नौ नाशोल्लासौ विहाय अहं यथासुखमासे ६ सुखादीति भावेषु अव
नाद्येषु सुखादिरूपानियमं सुखदुःखादि धर्माणामनियमं मुहुः विशेषवशात्पुरुषस्य लेप्सालोका स्मा
त् सुखाद्यनिमत्तदर्शनाद्वेतोरहं यथासुखमासे ७ इति श्रीमत् त्रयोदशप्रकरणम् १३ उदीरि
तां स्वावस्थामसमर्थापितमात्मनि आह शिष्यः स्वभावस्थो चतुः श्लोकात् गुरुं प्रति १ पूर्वं गुरुणो
पदशमाष्टकमुक्तं सम्प्रति तु शिष्यः स्वस्वावस्थासमर्थनार्थमात्मनः स्वभावस्थामाह प्रकृत्येति
स्वपतेनास्ति हानिर्मे सिद्धिर्यत्नवतो न वा नाशोल्लासौ विहायास्मादहमासे यथासुखं ६ सुखा
दिरूपानियमं भावेष्वालोक्य भूरिशः शुभाशुभे विहायास्मादहमासे यथासुखं ७ इति समाप्तं ॥
प्रकृत्या शून्यचित्तो यः प्रमादाद्भावभावनः निद्रितो बोधित इव क्षीणसंसरणो हि सः १ ॥
क्व धनानि क्व मित्राणि क्व मे विषयदस्यवः क्व शास्त्रं क्व च विज्ञानं यदा मे गलिता स्पृहा २ ॥
विज्ञाते साक्षिपुरुषे परमात्मनि चेश्वरे नैराश्ये बंधमोक्षे च न चिंता मुक्तये मम ३ ॥
प्रकृत्या स्वभावेन विषयेषु शून्यचित्तः प्रमादादबुद्धिपूर्वकमारब्धवशाद्भावान् विषयान् भावयति वि
नयति भावभावनः कइव निद्रितो बोधित इव यथा निद्रावशाच्छून्यचित्तः केनचित्प्रबोधितस्तावत्प्रमा
दाद्भावभावनः एवं विधो यः पुमान् विषयेषु शांतचित्तः स हि निश्चितं क्षीणः संसरणः संसारहेतुर्विष
यानुसरणाभावादित्यर्थः १ क्व धनानीति विषयभावनाशून्यस्य स्वप्नेन्मत्तदर्शिनो मे यदा स्पृहा विषय
तृष्णा गलिता तदा मम धनानि क्व विषयरूपा दस्यवश्चोराः क्व शास्त्रं क्व च विज्ञानमहं ब्रह्मास्मीति निदि
ध्यासनं क्व धनादि विज्ञानांतेषु पि मम भावस्था नास्तीत्यर्थः २ विज्ञात इति देहेंद्रियादीनां साक्षिपुरुषे प
रार्थ परमात्मनि विश्वेश्वरे तत्पदार्थे ज्ञाते त्वं ब्रह्माहमस्मीति साक्षात्कृते सति निराशे नि मुक्ते विद्रूपात्मज्ञाना

अंतःकरणेविकल्पशून्यस्यबहिः भ्रांतस्येवस्वच्छंदचारिणः
ननुप्रमादाद्भावभावुकः कथंशांतस्येत्याशंक्याह अंतर्विकल्पेति दुर्लभ्यमात्मनस्तत्त्वं प्रसाद्योपितमंजसा एकरूपत्वोपदे
तानिनोदशास्तास्तादृशाएवज्ञानिनएवजानन्ते ४ इतिश्री १८ कृतएवतथापिनतदात्मनस्तवमरोवासिभ्यः गुरुरुपदेष्ट
ष्टार्थंगुरुराहह्रदयोदधिः १ यद्यपिप्रथममात्मतत्त्वोपदेशः कृतएवतथापि शिष्यार्थंअसकृदात्मोपदेशार्थंगुरुराह
बहुलत्वात् यथाच्छंदोगोपनिषदिनवकृत्वः श्वेतकेतवेतीमाचार्यः शिष्याणांयथातथाप्रापत्तोपुपदेशेन
तत्रादौज्ञानादिकारिणमनधिकारिणंचाह यथातथेति सत्त्वबुद्धिमान् शिष्यायथा तथाप्रापत्तोपदेशेन
कृतार्थोपिस्यात् अतएवकृतयुगेमरणवमात्रोपदेशात् पिशिष्याः कृतार्थाबभूवुः परः असत्त्वबुद्धियावज्जीवं
जिज्ञासुरपिबहुधोपदिष्टोपिविमुह्यतियथाविरोचनोब्रह्मणाबहुधोपदिष्टोपिसंमोहंवेत्यर्थः १ बंधमोक्षौ
अंतर्विकल्पशून्यस्यबहिः स्वच्छंदचारिणः भ्रांतस्येवदशास्तास्तास्तादृशा एवजानन्ते ४ इतिव
यथातथोपदेशेनकृतार्थः सत्त्वबुद्धिमान् आजीवमपिजिज्ञासुः परस्तत्रविमुह्यति १
तक ४ मोक्षोविषयवैरस्यंबंधोवैषयिकोरसः एतावदेवविज्ञानंयथेच्छसितथाकुरु २ वाग्मिप्राज्ञ
महोद्योगंजनंमूकजडालसं करोतितत्त्वबोधोयमतस्त्यक्तोबुभुक्षुभिः ३ श्रीगणेशायनमः॥
स्वबोपायेनसंग्रहेणनिरूपयति मोक्षइति विषयेष्वनुरागाभावएवमोक्षोविषयेष्वनुरागस्तुबंधइत्यर्थः
एतावदेवमोक्षयोर्विशिष्टमल्पस्वज्ञानमेवज्ञात्वायथेच्छसितथाकुरु २ इदंतत्त्वविषयवैरस्यंतत्त्वबोध
साध्यमित्याह वाग्मीति अयंप्रसिद्धः आत्मतत्त्वबोधोवाग्मिनंवक्तृवाक्यभाषिणंमूकंकरोति प्राज्ञना
नाविशेषवेदिनंजनंजडंकरोति महोद्योगंनानाक्रियानुष्ठानशालिनंअलसंनिष्क्रियंकरोति मनसः प्र
त्यकप्रवणतयावागादयः कुंठिताभवंतिनत्वहितोभवतीत्यर्थः एतोयंतत्त्वबोधोवागादीन्कुंठिता
नकरोति अतोहेतोभोगेच्छुभिस्त्यक्त अनाहतइत्यर्थः ३ ॥

अं २

तत्त्वबोधसिद्ध्यर्थमुपदिशति नत्वमिति नत्वं देहादिरूपो नयतस्त्वं चिद्रूपोऽसि नापि तव देहसंबंधः असंगो ह्ययं पुरुष इति श्रुतेः नवा भवान् कर्ता भोक्ता यतः कर्तृभोक्तृप्रभृतीनां सदा साक्षी यो यस्य साक्षी स तद्भिन्नो यथा घटसाक्षी घटाद्भिन्न इत्यर्थः अतस्त्वं देहसंबंधिषु निरपेक्षः सन् सुखं चरेत्यर्थः ४ निरपेक्षत्वमुपपादयितुमाह रागेति रागद्वेषौ तु मनोधर्मौ न तु तव धर्मौ मनस्तु कदाचिदपि न तव संबंधि न भवति अतस्त्वं तद्धर्मासङ्गात्तद्धर्मासंसक्त इत्यर्थः ननु रागद्वेषौ ममैव धर्मौ कथं नेत्याशंक्याह निर्विकल्प इति यतस्त्वं निर्विकल्पो बोधात्मा वासि अतो रागादिविकाररहितः सन् सुखं चरेत्यर्थः ५ सर्वेति सर्वभूतेषु कारणत्वेनानुस्यूतमात्मानं विज्ञाय विभागसर्वभूतानि चात्मनि अध्यस्तानीति विभाव्य अहंकारादेः सर्वस्यात्मत्वेनैव स्फुरणात् अहं ममाभिमानरहितस्त्वं सुखी भव ६ सर्व

न त्वं देहो न ते देहो भोक्ता कर्ता न वा भवान् चिद्रूपोऽसि सदा साक्षी निरपेक्षः सुखं चर ४ रागद्वेषौ मनोधर्मौ न मनस्ते कदाचन निर्विकल्पोऽसि बोधात्मा निर्विकारः सुखं चर ५ सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि विज्ञाय निरहंकारो निर्ममस्त्वं सुखी भव ६ विश्वं स्फुरति यत्रेदं तरंगा इव सागरे तत्त्वमेव न संदेहश्चिन्मूर्ते विज्वरो भव ७ श्रद्धत्स्व तात श्रद्धत्स्व नात्र मोहं कुरुष्व भोः ज्ञानस्वरूपो भगवानात्मा त्वं प्रकृतेः परः ८ गुणैः संवेष्टितो देहस्तिष्ठत्यायाति याति च आत्मा न गंता नागंता किमेनमनुशोचसि ९ देहस्तिष्ठतु कल्पांतं गच्छत्वद्यैव वा पुनः क्व वृद्धिः क्व च वा हानिस्तव चिन्मात्ररूपिणः १० ॥ [illegible] नमः

भूतानि चात्मनीत्येतद्विषदयति विश्वमिति यत्र इदं विश्वं सागरे तरंगा इवाधिष्ठानाभिन्नं तथैव तच्चैतन्यं तत्त्वमेवातः कारणात् हे चिन्मूर्ते त्वं विज्वरो भव चिन्मात्रोऽहमित्यनुभवान्निवृत्तसर्वसंतापो भवेत्यर्थः ७ परमकारुणिकतया पुनः पुनर्बोधयति श्रद्धत्स्वेति हे तात श्रद्धत्स्व अत्र चिद्रूपतायां असंभावनाविपरीतभावनारूपं मोहं कुरुष्व अत्रैवमुक्तं विषदयति ज्ञानेति ज्ञानस्वरूपः प्रकृतेः परस्त्वं कोऽसौ आत्मा स भगवान् त्वमित्यर्थः तथा आत्मा त्वं पदार्थः ८ गुणैरिन्द्रियादिभिः संवेष्टितो देह इहलोके तिष्ठति तथा याति तथा कर्मवशात् लोकांतरं याति च गच्छति देहादिभिन्न आत्मा तु न गंता नाप्यागंता अतोऽहं गंताऽहं गमिष्यामीत्येवमेनं किं शोचसि देहधर्मैरात्मानं मा शोचयेत्यर्थः ९ नापि देहस्थितिस्तत्क्षोभेण न तव वृद्धिहानि

स्नातवृद्धिः नवाहेत नितान्तस्तापितिमर्थः १०॥

[illegible]

91

त्वयीति विश्वात्मा वीचिरपि त्वय्यनन्ते चित्समुद्रे उदेतु पृथग्वास्तमायातु एतावतापि ते न वृद्धिः न वा क्ष
तिः नवा नैतत्त्वादित्यर्थः ११ तातेति सर्वस्य तदभिन्नत्वात्किं हेयमुपादेयं कथं केन वा प्रकारेण हेयमुपादे
यं कुत्र वा हेयमुपादेयमित्यर्थः १२ एकस्मिन्निति एकस्मिन्सजातीयविजातीयस्वगतभेदशून्येऽव्यये शा
ते च कार्यशून्ये चिदाकाशे निर्मले च सर्वोपाधिशून्ये त्वयि कुतो जन्म कुतस्त्वकर्म कुतश्चाहंकारः द्वितीय
स्य हेतोरभावात्त्रयस्य च जन्मासंभवात् कार्यशून्यस्य सकर्मकत्वेनासंभवान्निर्मलस्य चाहंकारासंभवा

त्वय्यनन्ते महांभोधौ विश्ववीचिः स्वभावतः उदेतु वास्तमायातु न ते वृद्धिर्न वा क्षतिः ११ ॥
तात चिन्मात्ररूपोसि न ते भिन्नमिदं जगत् अतः कस्य कथं कुत्र हेयोपादेयकल्पना १२
एकस्मिन्नव्यये शान्ते चिदाकाशेमले त्वयि कुतो जन्म कुतः कर्म कुतोहंकार एव च १३ ॥
यत्त्वं पश्यसि तत्रैक स्त्वमेव प्रतिभाससे किं पृथग्भासते स्वर्णे कटकांगदनूपुरम् १४ ॥
अयं सोहमयं नाहं विभागमिति संत्यज सर्वमात्मेति निश्चित्य निःसंकल्पः सुखी भव १५ ॥
तवैवाज्ञानतो विश्वं त्वमेकः परमार्थतः त्वत्तोन्यो नास्ति संसारी नासंसारी च कश्चन १६ ॥

दित्यर्थः १३ एकत्वमुपपादयति यत्त्वमिति यद्यत्कार्यं त्वं पश्यसि तत्र कारणरूपस्त्वमेव एकः प्रतिभाससे क
टकांगदादौ स्वर्णवदित्यर्थः १४ अयं सोहमिति कारणरूप आत्मैव सर्वमिति निश्चित्य भेदभ्रमं त्यज तथा
च निर्विकल्पो विगतनानाप्रतिभः सन् सुखी भव द्वितीयप्रतिभानादि दुःखं भवतीत्यर्थः १५ विभागत्या
गे युक्तिमाह तवैवेति तवैव अज्ञानतो विश्वं विश्वाकारो विक्षेपः अतः परमार्थतस्त्वमेकः अतः संसा
रं संसारी च त्वत्तोनान्यः कश्चिदित्यर्थः १६ रामाय नमः ॥

अ॰
२१

भ्रांतिमात्रमिति इदं विश्वं भ्रांतिमात्रसिद्धं अतो हेतोः न किंचित्पृथक् सत्तारहितमित्यर्थः इति निश्चयी अतः स
र्वस्य निरस्तत्वान्निर्वासनः स्फूर्तिमात्रो वासनारहितः स्फूर्तिमात्रः सन् न किंचिदिव निरस्ताशेषविशेषः स
न् शाम्यति १७ एक एवेति कालत्रयेपि भवांभोधौ एक एव त्वमेव अतस्तव बंधमोक्षौ न स्तः अतस्त्वं कृत
कृत्यः सन् सुखं चर १८ मा संकल्पेति हे चिन्मय त्वं संकल्पविकल्पाभ्यां चित्तं मा क्षोभय उपशाम्य तत्परं त
संकल्पविकल्पाभव आनंदरूपो स्वात्मनि सुखं तिष्ठ १९ ध्यानमपि त्यजेत्याह त्यजेति सर्वत्र ध्यानं त्यज कु
त्रापि ध्यानं मा कार्षीरित्यर्थः एतदेव विशदयति मा किंचिद् हृदि धारयेति मननमपि त्यजेत्याह आत्मेति

भ्रांतिमात्रमिदं विश्वं न किंचिदिति निश्चयी निर्वासनः स्फूर्तिमात्रो न किंचिदिव शाम्यति १७ ॥
एक एव भवांभोधावासीदस्ति भविष्यति न ते बंधोस्ति मोक्षो वा कृतकृत्यः सुखं चर १८ ॥
मा संकल्पविकल्पाभ्यां चित्तं क्षोभय चिन्मय उपशाम्य सुखं तिष्ठ स्वात्मन्यानंदविग्रहे १९ ॥
त्यजैव ध्यानं सर्वत्र मा किंचिद् हृदि धारय आत्मा त्वं मुक्त एवासि किं विमृश्य करिष्यसि २० ॥

आत्मा त्वं सदा मुक्त एवासि अतो विमृश्य विचार्य किं फलं करिष्यसि नित्यमुक्तत्वादित्यर्थः २० इति तत्त्वोपदेशविंशः १०

आचक्ष्व शृणु वा तात नानाशास्त्राण्यनेकशः तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते १ ॥

पृथक्तेनेन सर्वस्य विस्मृतिर्मुक्तिसाधनं तल्लाघवार्थं विशेषद्वारेणात्र वर्णितं तत्त्वज्ञानेन सर्वप्रपंचस्य दृश्य
कस्य तया विस्मरणकारिण्या वृत्तिरूपया दिहा तया मुक्तिः नान्यथेति विशेषमुपदिशति आचक्ष्वेति हे तात त्वं
नानाशास्त्राणि अनेकशः अनेकवारं शिष्येभ्यः आचक्ष्व गुरुभ्यः शृणु वा तथापि तव सर्वविस्मरणमृते स्वास्थ्यं

सुषुप्तौ तु यद्यपि विषयविस्मरणमस्ति तथापि अज्ञानविस्मरणं नास्तीति भावः जीवन्मुक्तस्य तु सर्व॰
स्याध्यस्तत्वात्तु संधानरूपं विस्मरणमस्तीति भावः सर्वविस्मरणे सति सर्वस्वरूपं चित्तं निरस्तसर्वाशंभ
वतीति सूचयन्नाह भोगमिति हे विज्ञ त्वं भोगं कुरु तथापि ते चित्तं असमर्थं रोचयिष्यति स्वरूपे रुचि
मुत्पादयिष्यति कीदृशं चित्तं निरस्तसर्वाशं सर्वविस्मरणे सति सर्वाशानुदयादित्यर्थः २ सर्वत्र॰
स्थाविलये सति तु कृतेनापि कर्मणा दुःखहेतुरायासो न भवतीति सूचयन्नाह आयासादिति सक
लो जनः आयासादेव दुःखी भवति परं तु कश्चन एनं आयासं न जानाति दुःखहेतुरायासमिति निवे

भोगं कर्म समाधिं वा कुरु विज्ञ तथापि ते चित्तं निरस्तसर्वाशमत्यर्थं रोचयिष्यति २
आयासात्सकलो दुःखी नैनं जानाति कश्चन अनेनैवोपदेशेन धन्यः प्राप्नोति निर्वृतिं ३
१९ व्यापारे खिद्यते यस्तु निमेषोन्मेषयोरपि तस्यालस्यधुरीणस्य सुखं नान्यस्य कस्यचित् ४
इदं कृतमिदं नेति द्वन्द्वैर्मुक्तं यदा मनः धर्मार्थकाममोक्षेषु निरपेक्षं तदा भवेत् ५ ॥

ति अनेनेति आयासात्सकलो दुःखीत्यनेनैवोपदेशेन धन्यः सुकृती निर्वृतिं परमसुखं प्राप्नोति ३
व्यापारेणानासक्तिः सुखहेतुरित्याह यः कर्मणि निमेषोन्मेषयोरपि व्यापारे खिद्यते अनासक्तो भवति
तस्यालस्यधुरीणस्य क्रियाभिनिवेशरहितस्य सुखं नान्यस्येत्यर्थः ४ याक्रियाभिनिवेशशून्यस्य॰
सर्वत्रास्थाविलये सति द्वन्द्वहानिर्भवतीति सूचयन्नाह इदं कृतमिति इदं कृतमिदं नेत्यादि द्वन्द्वैर्मुक्तं
यदा मनो भवति तदा पुरुषार्थचतुष्टयेऽपि निरपेक्षं भवेत् द्वन्द्वातीतस्य जीवन्मुक्तत्वादित्यर्थः ५ ॥

श्र० २२

पुरुषार्थकामना निरपेक्षस्तु विरक्तकामुकाभ्यां विलक्षण इत्याह विरक्त इति मुमुक्षुः सन् यो विषयद्वे-
ष्टा स विरक्तः कथ्यते कामम् आपेक्षः सन् यो विषयलोलुपः स रागीति कथ्यते यस्तु ग्रहमोक्षविहीनः ग्र-
हमोक्षेच्छाभ्यां विहीनः स विरक्तसरक्ताभ्यां विलक्षणः सर्वतो निरपेक्षतया हानोपादानेच्छारहितत्वा-
दित्यर्थः ६ ननु ज्ञानिनोपि हानोपानादी व्यवहारो दृश्यत इत्याह हेय इति निर्विचारदशास्पदं अविवेकद-
शामयी भूता स्पृहा तृष्णा यावत् जीवति तावत्पर्यन्तमेव हेयोपादेयता हानोपादानादिव्यवहारः संसार-
वृक्षस्य शाखोऽङ्कुरो भवति ज्ञानिनां तु स्पृहाभावात् सत्यपि हानादिव्यवहारे संसारशाखोप्ररोहो न भव-

विरक्तो विषयद्वेष्टा रागी विषयलोलुपः ग्रहमोक्षविहीनस्तु न विरक्तो विरागवान् ६
हेयोपादेयता तावत्संसारविटपाङ्कुरः स्पृहा जीवति यावद्वै निर्विचारदशास्पदं ७
प्रवृत्तौ जायते रागो निवृत्तौ द्वेष एव हि निर्द्वन्द्वो बालवद्धीमानेवमेव व्यवस्थितः ८ ॥
हातुमिच्छति संसारं रागी दुःखजिहासया वीतरागो हि निर्दुःखस्तस्मिन्नपि न खिद्यति ९

तीत्यर्थः ७ प्रवृत्ताविति प्रवृत्तौ सरागप्रवृत्तौ सत्यां मूढनरो नरं विषयेषु रागो जायते विषयेपि द्वेषपूर्व-
क निवृत्तौ सत्यां मूढनरो नरं विषयेषु द्वेष एव हि जायते अतो धीमान् ज्ञानी बालवत् शुभाशुभानुसंधान-
रहितः निर्द्वन्द्वः रागद्वेषविहीनः सन् एवमेव रागजाप्रवृत्तिर्द्वेषजा निवृत्तिर्द्वेषवशान्निवृत्तिर्विरहित एव
द्वेष० स्थितः केवलमारब्धवशादेव कदाचित्प्रवर्तते कदाचिन्निवर्तते च न तु रागद्वेषादित्यर्थः ८ हातु-
मिच्छतीति यस्तु रागी स दुःखजिहासया संसारं हातुमिच्छति वीतरागस्तु निर्दुःखो रागाभावाद्दुःखरहित- त्वात्तस्मिन्संसारे सत्यपि न खिद्यति खेदं न प्राप्नोति ९॥

२० २२

यएवेति अहं त्रिकालदर्शी ज्ञानी मुक्तश्चेत्येवं यस्य मोदे ऽपि अभिमानो नाऽसौ ज्ञानी तथा अहं योगाभ्यासी
देहस्यैव गुणधर्मो धर्मस्ततः ममदेहो वह्न्याहारबहूपवासादि समर्थ इत्येवं देहे ऽप्यभिमानो नाऽसौ योगी
नवा ज्ञानी केवलमसौ दुःखभाक् दुःखहेतुत्वादहं ममाभिमानानिवृत्तेरित्यर्थः ॥ १ ॥ सर्वविस्मरणोपदेश
मुपसंहरति हरइति ॥ ११ ॥ इति श्रीमदष्टावक्र० विशेषोपदेशः षोडशः ॥ १६ ॥ अथातः श्लोकविंशत्यात
त्त्वज्ञानदशा प्रोच्यते विद्यातत्त्वप्रकर्षस्य मुक्तये गुरुणा स्फुटं ॥ १ ॥ स्पष्टं अथान्येषामपि विद्याया अहं तस्यैतत

यस्याभिमानो मोक्षे ऽपि देहे ऽपि ममता तथा नचाऽज्ञानी न वा योगी केवलं दुःखभागसौ ॥ १ ॥
हरोयद्युपदेष्टा ते हरिः कमलजो ऽपि वा तथापि न तव स्वास्थ्यं सर्वविस्मरणादृते ॥ ११ ॥
इति विशेषोपदेशः ॥ १६ ॥ तेन ज्ञानफलं प्राप्तं योगाभ्यासफलं तथा तृप्तः स्वच्छेन्द्रियो नित्य
मेकाकी रमते तु यः ॥ १ ॥ न कदाचिज्जगत्यस्मिन् तत्त्वज्ञो हन्त खिद्यति यत एकेन तेनेदं पूर्णं ब्र
ह्माण्डमण्डलं ॥ २ ॥ न जातु विषयाः के ऽपि स्वारामं हर्षयन्त्यमी सल्लकीपल्लवप्रीतमिवेभं निंब

तत्त्वज्ञानफलव्याख्यानतया तत्त्वज्ञानदशां गुरुः निरूपयति तेनेति तेनैव ज्ञानफलं प्राप्तं यः आत्मन्ये
व तत्त्वज्ञानफलव्याख्यानतया ... विवर्तभोगानुभोगादिना अतएव स्वच्छेन्द्रियो विषयानामर्षेन्द्रियः सन् एकाकी विषयसंयोगं विनैव नि
त्यमात्मन्येव रमते ॥ १ ॥ न कदाचिदिति हन्तेति महर्षेसंबोधने हे शिष्य अस्मिन् जगति कदाचिदपि
तत्त्वज्ञो न खिद्यते यत एकेनैव तेनेदं ब्रह्माण्डमण्डलं पूर्णं व्याप्तं अतो द्वितीयस्याभावान्न खिद्यतीत्य
र्थः ॥ २ ॥ न जात्विति स्वस्मिन्नात्मन्येव रमते तं स्वारामं जातु कदाचित् अमी विषया न हर्षयन्ति तत्स्वा

तथामलकीपल्लवकेनंतरंगतेविवेकपदलात इदंचंतितिवेदतलाभः ॥ २८ ॥

अ॰ यतीति यस्य भुक्तेषु आसक्तिः न भवति अभुक्तेषु आकाङ्क्षा न भवति आत्मारामत्वात् तादृशो भवदुर्लभः संसारे १
२३ कोऽपि एक इत्यर्थः ४ बुभुक्षुरिति संसारेषु बुभुक्षुर्मुमुक्षुश्चानेकधा दृश्यते भोगमोक्षनिराकाङ्क्षी महति पूर्णे ब्र॰
ह्मणि आशयोऽन्तःकरणं यस्य स महाशयो विरलः यततामपि सिद्धानां कश्चिन्मां वेत्ति तत्त्वत इति भगवद्वच
नात् ५ धर्मार्थेति धर्मार्थं च तत्रैव यतता जीवितमरणयोर्यथायोग्यं हेयोपादेयरहितो विरल इत्यर्थः ६
वाञ्छेति तस्मात् ज्ञानिनो विश्वविलये प्रपञ्चस्य स्थितौ च द्वेषो नास्ति अपि तु अनेनैव बुद्धिकरणेन तस्मात्
कारणाद्धन्यो विद्वान् आरब्धवशात् प्राप्तया यथा प्राप्तया जीविकया सुखमनतिक्रम्य वा आस्ते इत्यर्थः ७ कृ

यस्य भोगेषु भुक्तेषु न भवत्यधिवासितः। अभुक्तेषु निराकाङ्क्षी तादृशो भवदुर्लभः॥ ४ बुभुक्षुरिह संसारे
मुमुक्षुरपि दृश्यते। भोगमोक्षनिराकाङ्क्षी विरलो हि महाशयः॥ ५ धर्मार्थकाममोक्षेषु जीविते मरणे तथा।
कस्याप्युदारचित्तस्य हेयोपादेयता न हि॥ ६ वाञ्छा न विश्वविलये न द्वेषस्तस्य च स्थितौ। यथा जीविकया
तस्माद्धन्य आस्ते यथासुखम्॥ ७ कृतार्थोऽनेन ज्ञानेनेत्येवं गलितधीः कृती। पश्यञ्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्ना
स्ते यथासुखम्॥ ८ शून्या दृष्टिर्वृथा चेष्टा विकलानीन्द्रियाणि च। न स्पृहा न विरक्तिर्वा क्षीणसंसारसागरे॥ ९ म॰ २२

तार्थेति अहमनेन ज्ञानेन कृतार्थ इत्येवं गलितधीः कृती क्षणमपि दिक्षं कुर्वन्नपि सुखमनतिक्रम्य आस्ते कृता
र्थत्वधियः सत्वाद्बहिरिन्द्रियव्यापारे सत्यपि ज्ञानि विरक्तवन्नु खेदो न भवतीत्यर्थः ८ शून्येति क्षीणः संसारसा
गरो यस्य स तस्मिन् क्षीणसंसारे विरक्तिश्च न तस्य मनःकायेन्द्रियव्यापारो बलोन्मत्तादिवदित्याह शून्येति त
स्य दृष्टिर्मनोव्यापार शून्या संकल्पविकल्परहिता चेष्टा कायव्यापारो वृथा फलमनुद्दिश्यैव तस्य इन्द्रियाणि विक
लानि परःस्थितानामपि विषयाणाम निर्णायकत्वात् तदुक्तं यस्याज्ञाग्रतिश्च ज्ञानि सा निशा पश्यतो मुनेरिति २३

२ सागरे कृषेस्पृहा विषये ह्यापि न विरक्तिर्वा विषय २ त्रुटत॥

नजागर्तीति ज्ञानी नजागर्तिजाग्रदवस्थावान्नभवति अंतर्बहिर्विषयानननुसंधानादिति हेतुमाह नोन्मील
तीति बाह्यविषयाननानुसंधत्ते इत्यर्थः तथा ज्ञानी ननिद्रातिसुप्तोननिमीलतिजडोन्मत्तवत् अनयोःसर्वान्विष
याननुसंधत्तेनपश्यतीत्यर्थः कातर्हितस्यदशेत्यतआह अहो इत्याश्चर्ये मुक्तचेतसः कापि अलौकिकीपर
दशा उत्कृष्टावस्थातुरीयातीतेत्यर्थः ९ इदमेवविशदयति सर्वत्रेति सर्वत्रसुखदुःखेषुस्वस्थचित्तस्तथा
सर्वत्र ग्रामेमित्रेचविमलाशयः सर्वत्रसमदर्शीयतः समस्ताविषयवासनाभ्योमुक्तः अतएवमुक्तः सर्वत्र
नजागर्तिननिद्रातिनोन्मीलतिनमीलति अहोपरदशाकापिवर्ततेमुक्तचेतसः ९ सर्वत्रदृश्यतेस्व
स्थःसर्वत्रविमलाशयः समस्तवासनामुक्तोमुक्तःसर्वत्रराजते १० पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्न
23 न्गृह्णन्वदन्व्रजन् ईहितानीहितैर्मुक्तोमुक्तएवमहाशयः ११ ननिंदतिनचस्तौतिनहृष्यतिनकु
प्यति नददातिनगृह्णातिमुक्तःसर्वत्रनीरसः १२ सानुरागांस्त्रियंदृष्ट्वामृत्युंवासमुपस्थितं अवि
ह्वलमनाःस्वस्थोमुक्तएवमहाशयः १३ सुखेदुःखेनरेनार्यांसंपत्सुचविपत्सुच विशेषोनैवधीरस्यस
र्वत्रसमदर्शिनः १४ नहिंसानैवकारुण्यंनौद्धत्यंनचदीनता नाश्चर्यंनैवचक्षोभःक्षीणसंसरणेनरे १५
सर्वत्रस्वस्थमाहराजतेदीप्यतेसूर्यादिवत्दर्शित्वात् १० पश्यन्निति आरब्धवशाद्दर्शनादिकंबहिरिंद्रियव्यापारं
कुर्वन्नपि ईहितानीहितैरिच्छाद्वेषैःमुक्तोमहाशयोमहतिआत्मनिआशयोयस्यसमहाशयोमुक्तएवमनोवि
कारातीतत्वात् ११ इदमेवविशदयति ननिन्दतीति स्पष्टं १२ किंचसानुरागामिति सानुरागांस्त्रियंदृष्ट्वाअ
थवासमुपस्थितंमृत्युंदृष्ट्वाअविह्वलमनाःकामभयाभ्यामविमुक्तमनामहाशयोमुक्तएव १३ किंचसुखे
तिसतिक्षीणसंसरणेनरेनराभिमानरहितेविदुषिहिंसानामयपवद्रोहश्रमादयोमनोविकारानभवं

[illegible]

श्री: २४

न मुक्त इति जीवन्मुक्तो विषयद्वेष्टापि न वा विषयलोलुपः किं तर्हि असंसक्तमनाश्च विह्वलमनाः सन् प्रारब्धवशात् प्राप्ताप्राप्तमुपाश्नुते भुङ्क्ते इत्यर्थः १७ समाधानेति बहिः शून्यचित्तो ज्ञानी समाधानादिविविधाः कल्पना न जानाति च केवलं तिष्ठति विदेहकैवल्यप्राप्त इव १८ निर्मम इति अहं ममाभिमानशून्यस्तथापि इष्टानिष्टं किंचिन्नास्तीति निश्चयवान् अत एव अन्तर्गलितसर्वाशः अत एव कुर्वन्नपि न करोति कर्तृत्वाभिमानरहितत्वादित्यर्थः १९ मन इति गलितसविशेषवृत्तिः निर्हीनमानसः यस्य स ज्ञानी कामपि अनिर्वाच्यां दशां संप्राप्तो भवेत् तदेव दर्शयति मनःप्रकाशविवर्जितस्य विशेषप्रकाशाभावात् तथा संमोहविवर्जितः प्रत्यक्स्वरूपचिन्तनात् अत एव

न मुक्तो विषयद्वेष्टा न वा विषयलोलुपः असंसक्तमना नित्यं प्राप्ताप्राप्तमुपाश्नुते १७ समाधानासमाधानहिताहितविकल्पनाः शून्यचित्तो न जानाति कैवल्यमिव संस्थितः १८ निर्ममो निरहंकारो न किंचिदिति निश्चितः अन्तर्गलितसर्वाशः कुर्वन्नपि न लिप्यते १९ मनःप्रकाशसंमोहस्वप्नजाड्यविवर्जितः दशां कामपि संप्राप्तो भवेद्गलितमानसः २० इति तत्त्वस्वरूपविंशतिका ९
यस्य बोधोदये तावत्स्वप्नवद्भवति भ्रमः तस्मै सुखैकरूपाय नमः शान्ताय तेजसे १ राम ॥

स्वप्नविवर्जितो जाड्येन सुषुप्त्या च विवर्जित इत्यर्थः २० इति श्रीम॰ तत्त्वस्वरूपविंशतिके समदशे प्रकरणे १७
तत्त्वाभिज्ञे फलीभूत तत्त्वस्यैव प्रधानता व्याख्यातेन ... इति श्लोकैः पुनः स्फुटं तत्र तावदुक्तिः प्राप्तानन्तरं ... फलीभूतां तां शान्तिं वर्णयितुकामः शान्तिशालिनं नमस्करोति यस्येति बोधोदये सति तावत् तत्क्षणमेव प्रपञ्चभ्रमः स्वप्नवत् तुच्छो यस्य ज्ञानतो भवति तस्मै शान्ताय निवृत्तसंकल्पविकल्पाय अत एव सुखैकरूपाय दुःखोन्नविदुःखस्वभावाय अत एव तेजसे स्वप्रकाशाय ... विदुषे नमः २४
२॥

ननु यतिनोपि स्वविन्नः स्वरूपे तेन कथं शांतसंकल्प एव सुखैकरूप इत्याशंक्याह अर्जयित्वेति अ
खिलानर्थान् धनधान्यकोशादीन् अर्जयित्वा पुष्कलान् वक्रविधान् भोगानेव आप्नोति तेन सुखैक
रूपस्सन् ल्येयेदुःखभागिनात् सर्वपरित्यागमंतरेण सर्वसंकल्पविकल्पत्यागं विना सुखी स्वे
करूपो न हि भवेन्नैव स्यात् २ ननु संकल्पविकल्पयोस्त्यागस्तु ज्ञानमेव त्यागमात्रस्य
यथावत्प्राप्तुमशक्यत्वात् ज्ञानमेव त्यागः अस्ततस्त्यागासंभवात् इदमेव रूपकालकारेण विषद्यति
कर्तव्येति कर्तव्या नियानियानि कर्माणि तानि तानि दुःखान्येव मार्तंडज्वालाः खरतरसूर्येतेन १
अर्जयित्वाखिलानर्थान्भोगानाप्नोति पुष्कलान् नहि सर्वपरित्यागमंतरेण सुखी भवेत् २ ईहितेन
25 कर्तव्यदुःखमार्तंडज्वालादग्धान्तरात्मनः कुतः प्रशमपीयूषधारासारमृते सुखम् ३
भवोयं भावनामात्रो न किंचित्परमार्थतः नास्त्यभावः स्वभावानां भावाभावविभाविनां ४
दग्धः अंतरात्मा मनो यस्य तस्य संकल्पप्रशमामृतधारासारं विना सुखं कुतः स्यात् ३ संकल्प
प्रशमस्यामृतत्वे संसाररूपविषनिवर्तकत्वादित्याशयेनाह भवोयमिति अयं भावः भावनामात्रः
प्र. संकल्पमात्रविभवः परमार्थतः आत्मव्यतिरिक्तं किंचिन्नास्ति परमार्थतस्त्वात्मैव भावरूपः नभ
वोयमिति ननु अभावस्वरूपोपि प्रपंचः कालादिवत् प्राग्भावस्वभाव इत्याशंक्याह नास्तीति भावा
भावेषु विभाविनां स्थितानां अभावो नास्तीति नहि उष्णस्वभावो वह्निः कदाचिदपि शीतलस्वभा
वो दृष्टः तथा च मनोराज्यवद्भावनामात्रसिद्धोसत्स्वभावः प्रपंचो भावनानिवृत्तौ निवर्तते इति संकल्प

प्रशमः संसारविषयतापापहृदात्मामृतप्राप्ति हेतुत्वाम् नमितिभावः ४ ॥ एम ॥

अ॰ ननु संकल्पोपरममात्रेण कथमात्मावस्तत्प्राप्तिरित्याशंक्य तस्य नित्यप्राप्तत्वमाह नदूरमिति आत्मनः प
२५ दं स्वरूपं दूरं नास्तीति नापि संकोचाद्दर्तते परिच्छिन्नेनास्ति परिपूर्णत्वात् अतएवात्मनः पदं नित्यलब्धं प्रा
प्तमेवास्ति संकल्पवशात्तु नरप्राप्तमिवाविद्वांसो मन्यन्ते कण्ठगतचामीकरवत् कीदृशं पदं निर्विकल्पं
विकल्पातीतं कल्पनाभावगम्यं वा तथा निरायासं आयासातीतं तद्भावगम्यं वा निर्विकारं विकारातीतं
तेनिरंजनं उपाधिमलशून्यं ५ कथं तर्हि तत्त्वज्ञानेन तत्प्राप्तिव्यवहारः प्रागज्ञकारणमित्याशंक्या
र॰ तिनाशमात्रादेवेत्याह व्यामोहेति ज्ञानेन निरावरणदृष्टयः अविद्यानाशात् तद्दृष्ट्यो व्यामोहमात्रस्याप्य

न दूरं न च संकोचाल्लब्धमेवात्मनः पदं । निर्विकल्पं निरायासं निर्विकारं निरंजनं ५ व्या
मोहमात्रविरतौ स्वरूपादानमात्रतः । वीतशोका विराजन्ते निरावरणदृष्टयः ६ सम १८
स्तं कल्पनामात्रमात्मा मुक्तः सनातनः । इति विज्ञाय धीरो हि किमभ्यस्यति बालवत् ७ आ
त्मा ब्रह्मेति निश्चित्य भावाभावौ च कल्पितौ । निष्कामः किं विजानाति किं ब्रूते च करोति किं ८ ॥

चश्रान्तिमात्रस्य विरतौ सत्यां स्वरूपादानमात्रतः आत्मविश्रान्तिमात्रतो वीतशोका विराजन्ते सर्वदा स्वभा
वेनैव पूर्णा हि तीयनयाप्रकाशन्त इत्यर्थः ६ आत्मज्ञानरहस्यमाह समस्तमिति स्पष्टार्थमिदं ७ ॥
समस्तं कल्पनामात्रमिति ज्ञानस्य निदानभूतेन त्वंपदार्थज्ञानमाह आत्मेति आत्मा त्वंपदार्थः ब्र
ह्म तत्पदार्थाभिन्न इति निश्चित्य अधिष्ठानसाक्षात्काराच्च भावाभावौ घटादि तदभावौ कल्पितौ विति
निश्चित्य तथा च सर्वस्य तत्कल्पनानुसंधानात्कामहेतुत्वविद्याविलयाच्च निष्कामः सन् किं विशिष्टतया ८
जानाति किं ब्रूते किं च कार्यं करोति कर्तृत्वाभिमानरहितत्वात् ज्ञानापि न वक्तापि न क्रियाकर्तापि नेत्य ॐ २५

सर्वमात्मेतिज्ञानेन सर्वकल्पनानिवर्तकमित्याह अयमिति सर्वमात्मेति निश्चित्य अनुभूय तूष्णींभूतस्य निरस्तप
रावाग्व्यापारस्य पुरुषस्य इति विविधाः कल्पनाः क्षीणा भवति इतीति किं अयं सोहमिति यथाहं पूर्वदिने अन्नमका
र्षं सोहं यजामि अयं देवदत्तो गच्छति नाहं गमिष्यामीत्यादयः कल्पनाः क्षीणा भवन्तीत्यर्थः ९ निरस्तसंक
ल्पस्य स्वरूपमाह द्वाभ्यां न विक्षेप इति उपशान्तविकल्पस्य योगिनो विक्षेपो व्यग्रता न ऐकाग्र्यादिकमपि
नेत्यर्थः १० स्वाराज्यमिति स्वाराज्ये स्वर्गराज्ये भैक्ष्यवृत्तौ च परार्थे अवस्थलाभे जने जनसमूहे विजने वने
च विशेषो योगिनो नास्ति कीदृशस्य विकल्परहितस्वभावस्येत्यर्थः ॥ क्व धर्म इति इदं कृतमिदं न कृतमित्या

अयं सोहमयं नाहमिति क्षीणा विकल्पना। सर्वमात्मेति निश्चित्य तूष्णींभूतस्य योगिनः ९

27 न विक्षेपो न चैकाग्र्यं नातिबोधो न मूढता। न सुखं न च वा दुःखमुपशान्तस्य योगिनः १०

स्वाराज्ये भैक्ष्यवृत्तौ च लाभालाभे जने वने। निर्विकल्पस्वभावस्य न विशेषोस्ति योगिनः ११

क्व धर्मः क्व च वा कामः क्व चार्थः क्व विवेकिता। इदं कृतमिदं नेति द्वन्द्वैर्मुक्तस्य योगिनः १२ ॥

कृत्यं किमपि नैवास्ति न कापि हृदि रञ्जना। यथाजीवनमेवेह जीवन्मुक्तस्य योगिनः १३ ॥

दिद्वन्द्वैर्मुक्तस्य योगिनो धर्मार्थकामाः विवेकिता मोक्षोपायभूतो विवेकश्च न भवति तन्मूलभूताविद्या
कामसंकल्पादीनां विनाशादित्यर्थः १२ कथं तर्हि जीवन्मुक्तस्य लोके क्रियेत्याशंक्य जीवनादृष्टवशा
देवेत्याह कृत्यमिति जीवन्मुक्तस्य योगिनः संकल्पवशात् किमपि कृत्यं नास्ति तथा हृदि मनसि का
पि रञ्जना कोपि अनुरागो नास्ति तद्धेतुभूताविद्याया अभावात् तथापि अस्य कृत्यं यथाजीवनं जीव
नादृष्टमनतिक्रम्य भवतीत्यर्थः १३ ॥

अं
२९

क्वमोह इति संकल्पसीमायामात्मबुद्धौ विश्रान्तस्य मोहादिकं क्व भवति किं कारणमाश्रित्य भवति न किमपि का
रणमाश्रित्य भवति आत्मबुद्ध्या कारणोपरमादित्यर्थः १४ येनेति येनेदं विश्वं घटपटादि दृष्टं स तदाहित
संस्कारः कदाचित् घटादिकं नास्तीति करोतु वै नास्तीति जानातु यः पश्यन्नपि न पश्यति स निर्वासनः सन्
किं कुरुते पदार्थविक्षेपकः संस्कारोऽपि नास्ति तस्य कर्तुमशक्यत्वादित्यर्थः १५ येनेति येन परं व्यतिरिक्तं ब्र
ह्म दृष्टं स अहं ब्रह्मेति चिन्तयेत् यस्तु द्वितीयं न पश्यति स निश्चिन्तः सर्वचिन्तारहितः सन् किं चिन्तयति
न किमपि चिन्तयति अद्वितीयात्मानुभववशात् तस्य चिन्तनमपि नास्तीत्यर्थः १६ ज्ञाननिश्चितनिरो

क्व मोहः क्व च वा विश्वं क्व तद्ध्यानं क्व मुक्तता । सर्वसंकल्पसीमायां विश्रान्तस्य महात्मनः १४
येन विश्वमिदं दृष्टं स नास्तीति करोतु वै । निर्वासनः किं कुरुते पश्यन्नपि न पश्यति १५
येन दृष्टं परं ब्रह्म सोऽहं ब्रह्मेति चिन्तयेत् । किं चिन्तयति निश्चिन्तो द्वितीयं यो न पश्यति १६
दृष्टो येनात्मविक्षेपो निरोधं कुरुते त्वसौ । उदारस्तु न विक्षिप्तः साध्याभावात्करोति किं १७
धीरो लोकविपर्यस्तो वर्तमानोऽपि लोकवत् । न समाधिं न विक्षेपं न लेपं स्वस्य पश्यति १८ ॥

धोऽपि नास्तीत्याह दृष्ट इति येनात्मविक्षेपश्चित्तादिभ्रमो दृष्टः असौ तु पुरुषश्चित्तनिरोधं कुरुते विक्षेपपरि
हारार्थं उदारः सर्वत्राद्वितीयात्मदर्शी तु विक्षिप्त एव नास्ति स विक्षेपपरिहारलक्षणस्य साध्यस्याभावा
त् किं कुरुते कथं निरोधं कुरुते इत्यर्थः १७ इदमेव विवृणोति धीर इति धीरः अद्वितीयात्मविश्रान्तो लो
कविपर्यस्तः लोकेषु विक्षेपरहितः प्रारब्धवशाल्लोकवद्वर्तमानोऽपि बाधितानुवृत्त्या व्यवहारपरोऽपि
सन् अयं समाधिरयं विक्षेपस्तथा अयं विक्षेपकृतो लेपः आत्मन इत्यादिकं न पश्यति चिन्मात्रदर्शित्वात् १८ २९

भावाभावेति यो बुधस्तत्त्वज्ञः स्वात्मानुभवतत्परः अत एव भावस्फूर्तिविहीनः अत एव निर्वासनः तेन लोकदृष्ट्या कुर्व
न्नपि किंचिदपि नैव करोति अकर्तात्मत्वेन न कर्तृत्वाध्यासबाधादित्यर्थः १९ इदमेव विशदयति प्रवृत्तौ वेति धी
रस्यात्मविश्रान्तस्य प्रवृत्तौ वा निवृत्तौ वा दुराग्रहः कर्तृत्वाभिमानो नास्ति कीदृशस्य धीरस्य प्रारब्धवशाद्यदाय
त्प्रवृत्तं वा निवृत्तं वा कर्तुमायाति तत्तत्सुखेनानायासेन तथा कुर्वतो तिष्ठतः अतः कर्तृत्वाभिमानाभावात्त
त्तिनाकृतमकृतमेवेत्यर्थः २० ननु ज्ञानी चेन्निर्वासनस्तर्हि केन प्रयुक्तः कर्म करोतीत्याशंक्याह निर्वासनइ
ति निर्वासनः अत एव निरालंबः कर्तव्याकर्तव्यानुसंधानरहितः अत एव स्वच्छंदः रागद्वेषानधीनः यत्ता

भावाभावविहीनो यस्तृप्तो निर्वासनो बुधः नैव किंचित्कृतं तेन लोकदृष्ट्या विकुर्वता १९ प्रवृ
त्तौ वा निवृत्तौ वा नैव धीरस्य दुर्ग्रहः यदा यत्कर्तुमायाति तत्कृत्वा तिष्ठतः सुखं २० निर्वासनो
29 निरालंबः स्वच्छंदो मुक्तबंधनः क्षिप्तः संस्कारवातेन चेष्टते शुष्कपर्णवत् २१ असंसारस्य तु
क्वापि न हर्षो न विषादता स शीतलमना नित्यं विदेह इव राजते २२ कुत्रापि न जिहासास्ति
नाशो वापि न कुत्रचित् आत्मारामस्य धीरस्य शीतलाच्छतरात्मनः २३ ॥ एम ॥।।

मुक्तबंधनः बंधहेतवज्ञानशून्यः ज्ञानी संस्कारवातेन क्षिप्तः प्रारब्धपवनेन प्रेरितः सन् शुष्कपर्णवच्चेष्टते
२१ संसारसंकल्पादिशून्यस्तु सर्वदा तुष्ट एवेत्याह असंसारस्येति नाविद्यते संसारहेतुः संकल्पो यस्य तस्य अत्र
संसारस्य हर्षो क्रमयोन जायते अत ऊर्मिरहितत्वान्नित्यं शीतलमना विदेहमुक्त इव राजते षडूर्मिरहितः
शिव इति स्मृतेः २२ कुत्रापीति आत्मारामस्य अत एव धीरस्य निश्चलचित्तस्य एव शीतलः अच्छतरो निर्मल
तरः आत्मा मनो यस्य तस्य शीतलाच्छतरात्मनो ज्ञानिनः कुत्रापि जिहासा त्यागेच्छा नास्ति उपादित्सापि नास्ति

रागद्वेषाभावात्नाप्येरोपि अन्यथापि कुत्रापि नास्ति अ
नर्थहेतोरज्ञानस्याभावादित्यर्थः २३ ॥

न्न १

अ. २

प्रकृत्येति प्रकृत्या स्वभावेन शून्यं विकाररहितं चित्तं यस्य तस्य धीरस्य आत्मविश्रान्तस्य प्राकृतस्येव अज्ञानिन
इव यदृच्छया प्रारब्धवशात् कुर्वतः अस्य विदुषः मानावमानता नास्तीत्यर्थः २४ कृतं देहेनेति इति चिन्तानुर
रुध्यते निरन्तरं स्मर्यते तेन कुर्वन्नपि न करोति कर्तृत्वाभिमानाभावादित्यर्थः २५ अतद्वादीति जीवन्मुक्तः
अतद्वादीव अहमिदं न करिष्यामीत्यवदन्नेव कार्यं कुरुते प्रारब्धवशात् वदन्नपि बालिशो मूर्खो न भवे
त् अन्तर्ज्ञानित्वात् अत एव संसरन्नपि समारब्धव्यवहारं कुर्वन्नपि अन्तः सुखी अत एव श्रीमान् अत्यन्तया शो

प्रकृत्या शून्यचित्तस्य कुर्वतोऽपि यदृच्छया प्राकृतस्येव धीरस्य न मानो नावमानता २४
कृतं देहेन कर्मेदं न मया शुद्धरूपिणा इति चिन्तानुरोधी यः कुर्वन्नपि करोति न २५
अतद्वादीव कुरुते न भवेदपि बालिशः जीवन्मुक्तः सुखी श्रीमान् संसरन्नपि शोभते २६
नानाविचारसुश्रान्तो धीरो विश्रान्तिमागतः न कल्पते न जानाति न शृणोति न पश्यति २७
असमाधेरविक्षेपान्न मुमुक्षुर्न चेतरः निश्चित्य कल्पितं पश्यन् ब्रह्मैवास्ते महाशयः २८

भावान् अत एव शोभते दीप्यते स्वप्रकाशतः इत्यर्थः २६ नानेति नानाविचारात् द्वैतविचारात् सुश्रान्तः खिन्न
हृतो यतोऽतो धीरो ज्ञानी अत एव आत्मन्येव विश्रान्तिमागतः अत एव न कल्पते संकल्पादिकं मनोव्यापारं न करो
ति न जानाति बुद्धिव्यापारं न करोति शब्दं न शृणोति रूपं न पश्यति इन्द्रियमात्रव्यापारं करोति कर्त्रभिमाना
भावादित्यर्थः २७ असमाधेरिति ज्ञानी मुमुक्षुर्न भवति असमाधेः समाधेरकरणात् तथा इतरो बद्धो नावि
क्षेपात् द्वैतभ्रमाभावादित्यर्थः कीदृशस्तर्हि ज्ञानीत्याशंक्याह निश्चित्येति इदं सर्वं कल्पितमिति निश्चित्य ब्रह्मैव ति

श्चित्य पश्यन् ब्रह्माधिष्ठानत्वेन साक्षात्पश्यन्नपि महाशयो नि
२८ विकारचित्तः अत एव ब्रह्मैवास्ते २८ ॥

ननु संसारं पश्यंश्चेत्कथं व्यवहारेणापाशे कथाह अहंकाराभावादित्याह यस्येति यस्यान्तःकरणेऽहंकाराध्यासः स्यात् स
स लोकदृष्ट्या न कुर्वन्नपि सकलमादिकं करोति कर्तृत्वाध्यासात् निरहंकारेण अत एव धीरेण कर्तृत्वाध्यासरहि-
तेन लोकदृष्ट्या कृतं तथापि स्वदृष्ट्या न किंचिदपि कृतं कर्तृत्वाध्यासाभावात् २९ मुक्तचित्तं वर्णयति द्वाभ्यां
नोद्विग्नमिति मुक्तस्य चित्तं राजते केवलप्रकाशरूपमेव यतो नोद्विग्नं उद्वेगहेतोः द्वेषस्याभावात् न च सन्तुष्टं स
न्तोषहेतुरागाभावात् तथाकर्तृस्पन्दवर्जितं संकल्पविकल्पशून्यं अत एव निराशं गतः संदेहो यस्मात् तद् ग
तसंदेहं संदेहहेतोरज्ञानस्य नष्टत्वादित्यर्थः ३० निर्ध्यातुमिति यस्य ज्ञानिनश्चित्तं निर्ध्यातुं निःक्रियत्वेन स्थातुं

यस्यान्तःस्यादहंकारो न करोति करोति सः । निरहंकारधीरेण न किंचिदकृतं कृतम् २९

31 नोद्विग्नं न च संतुष्टमकर्तृ स्पन्दवर्जितं । निराशं गतसंदेहं चित्तं मुक्तस्य शोभते ३०

निर्ध्यातुं चेष्टितुं वापि यच्चित्तं न प्रवर्तते । निर्निमित्तमिदं किंतु निर्ध्यायति विचेष्टते ३१

तत्त्वं यथार्थमाकर्ण्य मंदः प्राप्नोति मूढतां । अथवायाति संकोचममूढः कोऽपि मूढवत् ३२

चेष्टितुं चेष्टां कर्तुं वापि न प्रवर्तते न संकल्पयति किंतु स्वेच्छाज्ञानिचित्तं निर्निमित्तं संकल्परहितमेव सत् निर्ध्याय
ति निश्चलस्वरूपे तिष्ठति तथा चेष्टते विविधां चेष्टां करोतीत्यर्थः ३१ ज्ञान्यज्ञानिनोर्विशेषं वदन् ज्ञानिनो
विरलत्वमाह तत्त्वमिति मंदश्चाज्ञानी यथार्थं तत्त्वं पदार्थाभेदरूपं तत्त्वमाकर्ण्य असंभावनाविपरीतभावनाभ्यां
मूढतां अविवेकं प्राप्नोति अथवा अगलितार्थं सज्ज्ञानात्कायसंकोचं चित्तसमाधिमायाति कोऽपि सहस्रे
ष्वेकश्चेतरसंमूढोऽपि वा सामान्यमूढवत्
बहिर्व्यवहारकर्ता भवति ३२ राम

अ॰ २९

अथवा यातिसंकोचमित्यनेनोक्ता एकाग्रता निरोधो द्वयमपि एकाग्रेति एकाग्रता एकलक्ष्यनिष्ठचित्तता
अथवा निरोधश्चित्तविलयो मूढैरत्यन्तसाक्षात्कारैर्विपरीतभावनानिवृत्त्यर्थं भृशमत्यर्थमभ्यस्यते स्वम
वत्सुषुप्तवत्देहात्मधीरहिता धीरा ज्ञानिनः प्रागुक्तं किमपि कृत्यं न पश्यन्ति अहं
तानंदात्मसाक्षात्कारेणवानानंदादिभ्रमस्पर्शपात्रत्वादित्यर्थः ३३ निरोधस्यापि किं विकारणतामाह
अप्रयत्नादिति मूढः पुरुषः अप्रयत्नाच्चित्तनिरोधात्प्रयत्नात्कर्मानुष्ठानाद्वा निर्वृतिं परमसुखं न प्राप्नो
ति आनंदहेतोरात्मानंदानुभवाभावादित्यर्थः प्राज्ञस्तु गुरुमुखाद्वाक्यमवाप्य केवलं तत्त्वनिश्चयमात्रेण

एकाग्रता निरोधो वा मूढैरभ्यस्यते भृशं धीराः कृत्यं न पश्यन्ति सुप्तवत्स्वपदे स्थिताः ३३
अप्रयत्नात्प्रयत्नाद्वा मूढो नाप्नोति निर्वृतिं तत्त्वनिश्चयमात्रेण प्राज्ञो भवति निर्वृतः ३४ २९
शुद्धं बुद्धं प्रियं पूर्णं निष्प्रपंचं निरामयं आत्मानं तं न जानन्ति तत्राभ्यासपरा जनाः ३५
नाप्नोति कर्मणा मोक्षं विमूढोभ्यासरूपिणा धन्यो विज्ञानमात्रेण मुक्तस्तिष्ठत्यविक्रियः ३६

निर्वृतो भवति दुःखहेतोरज्ञानस्याज्ञानध्वंसादित्यर्थः ३४ ननु मूढस्य योगाभ्यासादात्मानुभवो भविष्य
तीत्याशंक्याह शुद्धमिति तत्रज्ञायति अभ्यासपरा जना अज्ञानिन आत्मानं न विजानन्ति कीदृशं शु
द्धं मायामलातीतं अत एव बुद्धं स्वप्रकाशं प्रियं सुखस्वरूपं पूर्णं यतो निष्प्रपंचं अत एव निरामयं दुःख
त्रयरहितमित्यर्थः ३५ इदमेव विवृणोति नाप्नोतीति मूढो नात्मज्ञः अभ्यासरूपिणा योगाभ्यासा
त्मकेन कर्मणा मोक्षं न प्राप्नोति न कर्मणा न प्रजया धनेनेति श्रुतेः धन्यो भाग्यवान् विरलो विज्ञानमा २८
त्रेण विक्रियारहितो विद्याकामकर्मा न एवं मुक्तस्तिष्ठति ३६ ॥

मुमुक्षुरपि मूढो ब्रह्म नाप्नोतीत्याह मूढ इति मूढः अज्ञानी यतः चित्तनिरोधादेव ब्रह्म भवितुमिच्छति ततो ब्र
ह्म नाप्नोति अज्ञानस्यानिवृत्तत्वादित्यर्थः निश्चितं धीरो ज्ञानी अनिच्छन्नपि मोक्षमनिच्छन्नपि परब्रह्मरूपभाक्
भवति प्रतिबन्धकाज्ञानस्य निवृत्तत्वादित्यर्थः ३७ एतदेव स्पष्टयति निराधारा इति मूढा अज्ञानिनस्तु निराधारा ग्रह
व्यग्राः केवलेन चित्तनिरोधेनैवाहं मोक्ष्यामीति निष्कारणदुराग्रहव्यग्राः अतएव संसारपोषकाः संसारनिवर्त
कज्ञानपराङ्मुखत्वात् बुधैर्ज्ञानिभिस्त्वनर्थमूलस्यैतस्य संसारस्य मूलच्छेदः कृतः संसारमूलभूतस्याज्ञा
नस्य ज्ञानेन निवर्तकत्वात् ३८ न शान्तिमिति मूढः अज्ञानी यतः चित्तनिरोधात् शमितुमिच्छति ततः शा॰

मूढो नाप्नोति तद्ब्रह्म यतो भवितुमिच्छति अनिच्छन्नपि धीरो हि परब्रह्मस्वरूपभाक् ३७
निराधारा ग्रहव्यग्रा मूढाः संसारपोषकाः एतस्यानर्थमूलस्य मूलच्छेदः कृतो बुधैः ३८
न शान्तिं लभते मूढो यतः शमितुमिच्छति धीरस्तत्त्वं विनिश्चित्य सर्वदा शान्तमानसः ३९
क्वात्मनो दर्शनं तस्य यद्दृष्टमवलम्बते धीरास्तं तं न पश्यन्ति पश्यन्त्यात्मानमव्ययम् ४०
क्व निरोधो विमूढस्य यो निर्बन्धं करोति वै स्वारामस्यैव धीरस्य सर्वदासावकृत्रिमः ४१ ॥

न्तिं न लभते धीरो विवेकी तत्त्वं विनिश्चित्य शमितुमनिच्छन्नपि स्वभावादेव सर्वदा शान्तमानसो भवति चेतोवि
कारहेतोरज्ञानस्य निवृत्तत्वादित्यर्थः ३९ क्वात्मन इति यद्दृष्टं यस्य दृष्टं ज्ञातं तदवलम्बते दृश्यं विषयीकरोति
तस्य आत्मनो दर्शनं क्व न क्वापीत्यर्थः धीरा ज्ञानिनस्तं तं तिमिरप्रदीपनादिकं दृश्यपदार्थं न पश्यन्ति किं तु॰
चिद्रूपमात्मानं पश्यन्ति ४० क्वेति यः अज्ञानी मुक्तः चित्तनिरोधे निर्बन्धं करोति तस्य विमूढस्य क्व चित्तनिरो
धो न क्वापि अज्ञानिनो समाध्यपगमे पुनश्चित्तप्रसरात् स्वारामस्य आत्मारामस्यैव अतएव निश्चलचित्तस्य सर्व
दासौ चित्तनिरोधः अकृत्रिमः स्वाभाविकः सर्वदा स्वानुभवप्रणालीनत्वात् ४१ ॥ राम ॥ ॥ ॥

अ॰
२९

भावस्येति कश्चिन्नाकिंकादिभावस्य भावकः भावरूपपरमार्थः सन्प्रपंचस्फूर्तिभावयतीति मन्यते इति भावकः अपरः शून्यवादी बौद्धो न किंचिदस्तीति भावयतीति न किंचिद्भावकः कश्चित्तु महत्सेषु कश्चिदात्मानुभवशाली उभयाभावकः सन्नेवमेव उभयाभावनेनैव निराकुलः स्वस्थचित्त आस्ते इत्यर्थः ४२ न किंचिदपि चिंतयेदिति भगवद्वचनेन सिद्धान्तमभिप्रेत्याह शुद्धमिति कुबुद्धयो मूढबुद्धय एव शुद्धं निर्मलमद्वयं द्वैतवर्जितमात्मानं मननशीलं व्यापकं भावयन्ति चिंतयन्ति न तु जानन्ति साक्षात्कुर्वन्ति कुतः संमोहात् निर्मलत्वस्य कलितमलमापन्नत्वाद्द्वयस्य कल्पितद्वैतमापन्नत्वात् आत्मनश्च कल्पितानात्मत्वापन्नत्वात् स्वापन्नरूपचिंतनेन न तु मोहान्निवृत्तेः यतो न जानन्ति अतए

भावस्य भावकः कश्चिन्न किंचिद्भावकोऽपरः उभयाभावकः कश्चिदेवमेव निराकुलः ४२

शुद्धमद्वयमात्मानं भावयन्ति कुबुद्धयः न तु जानन्ति संमोहाद्यावज्जीवमनिर्वृताः ४३ ॥

मुमुक्षोर्बुद्धिरालंबमन्तरेण न विद्यते निरालंबैव निष्कामा बुद्धिर्मुक्तस्य सर्वदा ४४ ॥

विषयद्वीपिनो वीक्ष्य चकिताः शरणार्थिनः विशन्ति झटिति क्रोडं निरोधैकाग्र्यसिद्धये ४५

व यावज्जीवमनिर्वृताः परमसंतोषरहिताः संतोषस्य ज्ञानैकलभ्यत्वादित्यर्थः ४३ इदमेव विशदयति मुमुक्षोरिति मुमुक्षोरनधिगतात्मसाक्षात्कारस्य बुद्धिः सविशेषालंबनमन्तरेण न विद्यते साक्षात्काराभावात् मुक्तस्य जीवन्मुक्तस्य अत एव मुक्तावपि निष्कामा बुद्धिः सर्वदा निरालंबैव निर्विशेषात्मानुभवरूपैव सविषयादिपरित्याग एवात्मानुभवः ४४ निरोधोपि विषयस्फूर्तिचकितैरेवानुष्ठीयते न तु विद्वद्भिरित्याह विषयेति विषयद्वीपिनो विषयव्याघ्रान् वीक्ष्य शार्दूलद्वीपिनो व्याघ्र इत्यमरः भीताः शरणार्थिनः स्वात्मरक्षणार्थिनो मूढा एव निरोधसिद्धये एकलक्ष्यहेतिसिद्धये वा झटिति शीघ्रं क्रोडं कंदरांतः प्रदेशं विशन्ति न तु ज्ञानिन इत्यर्थः ४५ ॥

३४

वासनारागाएव विषयभयनिवृत्तिहेतुरित्याह निर्वासनमिति निर्वासनोयःपुरुषस्तल्लक्षणंहरिंसिंहं दृष्ट्वा विषयदंतिनो नशक्ताः संतस्तूष्णींमौनेयथास्यात्तथापलायंते कृतचाटवः कृतप्रियवचनाएवंत निर्वासनंदीपिनईश्वराकृष्टाःस्वयमागत्यसेवंतेइत्यर्थः ४६ नमुक्तीति निःशंकोगतसंशयः अतएव युक्तमानसोनिश्चलमानसः ज्ञानीमुक्तिकारिकांयमनियमादिक्रियांआग्रहात्रधत्ते किंनहिकर्तव्यं ४७ अध्यासरहितत्वाद्यथासुखंआत्मसुखमनुभवति ४७ ... लोकदृष्ट्या ... क्रियांकुर्वन्नास्तेइत्यर्थः ४७

ध्यासरहितत्वाद्यथासुखमात्मसुखमनुभवतिकिंपालोकदृष्ट्याईक्षणादिक्रियांकुर्वन्नास्तेइत्यर्थः ४७

वाक्येति वस्तुनश्चिदात्मनः श्रवणमात्रेणजातायाशुद्धबुद्धिःअखंडात्मसाक्षात्कारस्तेनोनिराकुलः

निर्वासनंहरिंदृष्ट्वातूष्णींविषयदंतिनः पलायंतेनशक्तास्तेसेवंतेकृतचाटवः ४६

नमुक्तिकारिकांधत्तेनिःशंकोयुक्तमानसः पश्यन्शृण्वन्स्पृशन्जिघ्रन्नश्नन्नास्तेयथासुखं ४७

वस्तुश्रवणमात्रेण शुद्धबुद्धिर्निराकुलः नैवाचारमनाचारमौदास्यंवाप्रपश्यति ४८

यदायत्कर्तुमायातितदातत्कुरुतेऋजुः शुभंवाप्यशुभंवापितस्यचेष्टाहिबालवत् ४९

स्वातंत्र्यात्सुखमाप्नोतिस्वातंत्र्याल्लभतेपरं स्वातंत्र्यान्निर्वृतिंगच्छेत्स्वातंत्र्यात्परमंपदं ५०

स्वस्वरूपस्थःपुरुषःआचारंक्रियानुष्ठानंअनाचारंनैष्कर्म्यंउभयत्रापि तटस्थत्वंवाएतत्त्रयमपिनैवप्रपश्य तिआत्मस्थत्वादित्यर्थः ४८ यदेति यदायच्छुभंनैष्कर्म्यंवाअशुभंअकर्मवाकर्तुमायातितल्लोकदृष्ट्या प्रारब्धवशात्कुरुतेऋजुरग्रहरहितःहियतःकारणात्तस्यचेष्टाबालवत्प्रारब्धमात्रायत्तारागद्वेषा नधीना ४९ स्वातंत्र्यादिति स्वातंत्र्यात्रागद्वेषानधीनत्वात्सुखंमनःप्रसादमाप्नोतियतःस्वातंत्र्यात्परं ज्ञानंप्राप्नोति तथास्वातंत्र्यान्निर्वृतिंनिर्विकल्पंसुखंगच्छेत्स्वातंत्र्यादेवस्वातंत्र्यात्परमंपदंस्वरूपेविश्रांतिंग

35

॥ ४९ ॥ अष्टा

अ॰
३॰

अकर्तृत्वमिति यदा स्वात्मनः अकर्तृत्वमभिमन्यते अभोक्तृत्वं च मन्यते तदा समस्ताश्चित्तवृत्तयः क्षीणा भवन्त्येव
अमुकं कर्माहं करिष्यामि अमुकं कर्माहं कारयिष्यामि अमुकं मे भोगं प्रभवति स्यादि चित्तवृत्तयः तु न उत्पद्यन्ते ज्ञा
नामस्मासामपि चित्तवृत्तीनामनुदयादित्यर्थः ५१ उच्छृङ्खलेति धीरस्य वीतस्पृहस्य अकृतकाश
कृत्रिमा तच्छृङ्खलापि शास्त्रनिरहितापि स्थितिः शोभते सस्पृहचित्तस्य मूढस्य तु कृत्रिमा शान्तिः न शोभ
ते इत्यर्थः ५२ निरस्तकल्पनाजालानि निरन्तरभोगतच्छ्रोतोरप्यनायहस्यादि विलसन्तीति निरस्तकल्

अकर्तृत्वमभोक्तृत्वं स्वात्मनो मन्यते यदा। तदा क्षीणा भवन्त्येव समस्ताश्चित्तवृत्तयः ५१
उच्छृङ्खलाप्यकृतिका स्थितिर्धीरस्य राजते। न तु सस्पृहचित्तस्य शान्तिर्मूढस्य कृत्रिमा ५२
विलसन्ति महाभोगैर्विशन्ति गिरिगह्वरान्। निरस्तकल्पना धीरा अबद्धा मुक्तबुद्धयः ५३
श्रोत्रियं देवतां तीर्थमङ्गनां भूपतिं प्रियम्। दृष्ट्वा सम्पूज्य धीरस्य न कापि हृदि वासना ५४ म॰
भृत्यैः पुत्रैः कलत्रैश्च दौहित्रैश्चापि गोत्रजैः। विहस्य धिक्कृतो योगी न याति विकृतिं मनाक् ५५

नाधीरा ज्ञानिनः कदाचित् प्रारब्धवशान्महाभोगैर्विलसन्ति क्रीडन्ति कदाचित् प्रारब्धवशाद् गिरिगह्वरा
न् पर्वतवनानि विशन्ति कीदृशा अबद्धा आसक्तिरहिताः यतो मुक्तबुद्धयः कर्तृत्वाध्यासरहितबुद्ध
य इत्यर्थः ५३ श्रोत्रियमिति धीरस्य ज्ञानिनः श्रोत्रियं देवतां तीर्थं दृष्ट्वा न सति हृदि कापि वासना ध
मार्थकामवासना जायते अङ्गनां भूपतिं प्रियं पुत्रादिकं च दृष्ट्वा कापि काम्यपदार्थवासना न जाय
ते सर्वत्र समबुद्धित्वादित्यर्थः ५४ भृत्यैरिति भृत्यादिभिर्विहस्य उपहस्य धिक्कृतस्तिरस्कृतो योगी

१६

३॰

संतुष्ट इति लोकदृष्ट्या संतोषादियुक्तोऽपि वस्तुतस्तद्रहितत्वस्य ज्ञानिनस्तां तामाश्चर्यदशां तादृशा
एव ज्ञानिन एव जानते ५६ कर्तव्यतैवेति कर्तव्यतैव ममेदं कर्तव्यमिति कार्यसंकल्प एव संसारस्तद्धे
तुत्वात् सूरयो ज्ञानिनस्तां कर्तव्यतां न पश्यन्ति न संकल्पयन्ति संकल्पमात्ररहितत्वात् कीदृशाः सूर
यः शून्ये सर्वकार्यरहिते तथा वर्तमानघटाद्याकारे तथा निराकारे अभावे ते निर्विकाराः समात्मदर्शि
नः अत एव निरामयाः संकल्पोपप्लवरहिता इत्यर्थः ५७ अकुर्वन्निति अकुर्वन्नपि मूढधीः सर्वत्र शून्या
कारनिराकारेषु संक्षोभात् संकल्पाद्व्यग्रो भवति लोकदृष्ट्या कृत्यानि कुर्वन्नपि कुशलो विद्वान् हि निश्चि

संतुष्टोऽपि न संतुष्टः खिन्नोऽपि न च खिद्यते तस्याश्चर्यदशां तां तां तादृशा एव जानते ५६
37 कर्तव्यतैव संसारो न तां पश्यन्ति सूरयः शून्याकारे निर्विकारे निर्विकार निरामयः ५७
अकुर्वन्नपि संक्षोभाद्व्यग्रः सर्वत्र मूढधीः कुर्वन्नपि तु कृत्यानि कुशलो हि निराकुलः ५८
सुखमास्ते सुखं शेते सुखमायाति याति च सुखं वक्ति सुखं भुङ्क्ते व्यवहारेऽपि शान्तधीः ५९
स्वभावाद्यस्य नैवार्तिर्लोकवद्व्यवहारिणः महाह्रद इवाक्षोभ्यो गतक्लेशः स शोभते ६०

तेन निराकुलः निश्चलचित्तः आत्मारामत्वात् ५८ सुखमिति प्राकृतवद्व्यवहारेऽपि जायमाने पूर्णेन तथीरा
त्मनिष्ठबुद्धिर्विद्वान् आस्ते सुखमनतिक्रम्य वा हेलं उपविशति शेते आगच्छति वक्ति भुङ्क्ते सर्वेन्द्रियव्यापा
रं कुरुत इत्यर्थः ५९ ननु ज्ञानिनोऽपि व्यवहारेषु कथं न खेद इत्यत आह स्वभावादिति व्यवहारिणोऽपि य
स्य ज्ञानिनो लोकवत् प्राकृतजनवत् आर्तिः खेदो न जायते कुतः स्वभावात् स्वात्मानन्दरसस्वभा
वात् सामर्थ्यादित्यर्थः स गतक्लेशो ज्ञानी महाह्रद इवाक्षोभ्यो निर्विकारः शोभते ६० || राम

अं॰
३१

निवृत्तिरिति लोकदृष्ट्याप्रतीयमानापि मूढस्य बाह्येन्द्रियव्यापाराणां निवृत्तिः प्रवृत्तिरूपैव जायते अहं
कारादीनाम् अनिवृत्तत्वात् धीरस्य ज्ञानिनो लोकदृष्ट्या प्रारब्धवशात् प्रतीयमानापि प्रवृत्तिरपि निवृत्तिफल
भागिनी मुक्तिपर्यवसायिनी स्याद् अहंकाराभिमानाभावादित्यर्थः ६१ परिग्रहेष्विति मूढस्य देहाभिमा-
निनः तत्संबंधितया परित्यक्तेषु परिग्रहेषु धनवेश्मादिषु प्रायो बाहुल्येन वैराग्यं दृश्यते देहे विगलि-
ताशस्य तत्संबंधिनि स्पृहादौ रागः क्व च शत्रुव्याघ्रादौ विरागता स्यात् देहे रागविरागयोर् अभावेन तत्सं-
बंधिषु रागविरागयोः वक्तुम् अशक्यत्वात् ६२ भावनेति मूढस्य दृष्टिः सर्वदा भावनायाम् अभावनायां

निवृत्तिरपि मूढस्य प्रवृत्तिरुपजायते प्रवृत्तिरपि धीरस्य निवृत्तिफलभागिनी ६१ ॥
परिग्रहेषु वैराग्यं प्रायो मूढस्य दृश्यते देहे विगलिताशस्य क्व रागः क्व विरागता ६२ ॥
भावनाभावनासक्ता दृष्टिर्मूढस्य सर्वदा भाव्यभावनया सा तु स्वस्थस्यादृष्टिरूपिणी ६३ ॥
सर्वारंभेषु निष्कामो यश्चरेद् बालवन्मुनिः न लेपस्तस्य शुद्धस्य क्रियमाणेऽपि कर्मणि ६४ ।

वाभावासक्ता अहं भावनां करोमि अहम् अभावनां करोमीत्य् अहंकारात् स्वस्थस्यात्मनिष्ठस्य तु सा दृष्टिः भा
व्यभावनया दृष्टिविनयाऽप्युपलक्षितापि अदृष्टिरूपिणी दृश्यदर्शनरहितरूपैव स्यात् अहं करो
मीत्यभिमानाभावादित्यर्थः ६३ ननु दृश्यभावने क्रियमाणेऽपि न दृष्टिः न कथं दृश्यफलविनी
नाशो वा निष्कामत्वादित्याह सर्वारंभेष्विति यो बालवन्निष्कामः सन् प्राक्तनवशात् सर्वारंभेषु चरेत्
प्रवर्तते तस्य शुद्धस्याहंकारमलवर्जितस्य कर्मणि क्रियमाणेन लेपो न कर्तृत्वात् स्याद् अहंकाराभावादित्यर्थः ६४ ३१

३६

एवंविधोधन्यइत्याह सएवेति सआत्मज्ञएवधन्योनान्योयःसर्वभावेषुसमात्मबुद्धिःअतएवनिस्तर्षमानसोवितृ
ष्णचित्तोभवतिकिंकुर्वन्पश्यन्स्पृशन्शृण्वन्जिघ्रन्नश्नन् ९३ तस्यैवधन्यत्वंयुक्तिमाह क्वेति धीरस्यज्ञानि
नःअतएवसर्वदाविकल्परहितस्यसंसारप्रपंचःक्व अतएवतत्प्रतिभासश्चक्व अतएवसाध्यंस्वर्गादिकंक्व अत
एवसाधनंयोगादिकंक्व ९४ सजयतीति सअर्थसंन्यासीदृष्टादृष्टप्रयोजनशून्योयतःपूर्णःस्वभावोविग्रहः
स्वरूपंयस्यसःपूर्णस्वरसविग्रहोजयतिसर्वोत्कर्षेणवर्ततेसकःयस्याकृत्रिमःस्वाभाविकःअनवच्छिन्नेपूर्णे

सएवधन्यआत्मज्ञःसर्वभावेषुयःसमः पश्यन्शृण्वन्स्पृशञ्जिघ्रन्नश्नन्निस्तर्षमानसः ९३
क्वसंसारःक्वचाभासःक्वसाध्यंक्वचसाधनं आकाशस्येवधीरस्यनिर्विकल्पस्यसर्वदा ९४
39 सजयत्यर्थसंन्यासीपूर्णस्वरसविग्रहः अकृत्रिमोनवच्छिन्नेसमाधिर्यस्यवर्तते ९५
बहुनात्रकिमुक्तेनज्ञाततत्त्वोमहाशयः भोगमोक्षनिराकांक्षीसदासर्वत्रनीरसः ९६ ॥
महदादिजगद्द्वैतंनाममात्रविजृंभितं विहायशुद्धबोधस्यकिंकृत्यमवशिष्यते ९७

स्वरूपेसमाधिर्यस्यवर्ततेसजयतीत्यर्थः ९५ ज्ञाततत्त्वस्यसर्वत्रनिराकांक्षत्वमेवमुख्यंलक्षणमित्याह
बहुनेति अत्रज्ञानिनिबहुनोक्तेनलक्षणेनकिंप्रयोजनंज्ञाततत्त्वोमहाशयःभोगमोक्षफलयोःनिराकां
क्षीअतएवसदासर्वत्रभोगमोक्षसाधनेषुनीरसःनिरनुरागः ९६ महदिति महदादिमहदहंकारपंचतन्मा
त्रपंचमहाभूतभौतिकजगल्लक्षणंद्वैतंनाममात्रेणैवविजृंभितंविभिन्नमिवभातंननुवास्तवंअतएवतत्त्वक
ल्पनांविहायस्थितस्यअतएवशुद्धबोधस्यस्वप्रकाशचिन्मात्रस्वरूपस्यकिंकृत्यमवशिष्यतेसच्चिदानंदप्राप्तिगमेनैव

अष्टावक्रगीताटीकायां ३९ ॥

अ० २२

ननु तथापि अनर्थशांत्यर्थं प्रयत्नः कर्तव्य इत्याह भ्रमभूतमिति अधिष्ठानसाक्षात्कारे सति इदं सर्वं भ्रमभूतं भ्र-
मेणैव कल्पितं अत एव इदं किंचित् किमपि वास्तवं नास्तीति निश्चयी अलक्ष्यस्फुरणः चिन्मात्रप्रतिभासवान् अ-
त एव शुद्धः स्वरूपसाक्षात्कारेणैव बाधितानात्मकमलत्वात् स्वभावेनैव शान्तो न तु धर्मार्थं ज्ञानातिरिक्तमपे-
क्षामित्यर्थः ७० शुद्धेति शुद्धस्फुरणरूपस्य स्वप्रकाशचिद्रूपस्य अत एव दृश्यभावं दृश्यपदार्थमपश्यतः
क्व च कुत्र कर्मणि विधिः क्व केषु वा विषयेषु वैराग्यं क्व केषु पदार्थेषु त्यागः क्व केभ्यः पदार्थेभ्यः शमोऽपि वा का-

भ्रमभूतमिदं सर्वं किंचिन्नास्तीति निश्चयी अलक्ष्यस्फुरणः शुद्धः स्वभावेनैव शाम्यति ७०
शुद्धस्फुरणरूपस्य दृश्यभावमपश्यतः क्व विधिः क्व च वैराग्यं क्व त्यागः क्व शमोऽपि वा ७१
स्फुरतोऽनन्तरूपेण प्रकृतिं च न पश्यतः क्व बन्धः क्व च वा मोक्षः क्व हर्षः क्व विषादिता ७२
बुद्धिपर्यन्तसंसारे मायामात्रं विवर्तते निर्ममो निरहंकारो निष्कामः शोभते बुधः ७३
अक्षयं गतसंतापमात्मानं पश्यतो मुनेः क्व विद्या क्व च वा विश्वं क्व देहोऽहं ममेति वा ७४

यो दृश्यपदार्थः सेवा स्फुरणादित्यर्थः ७१ स्फुरदिति चिद्रूपेण स्वप्रकाशमानस्य बन्धादिकं नास्तीत्यर्थः ७२
बुद्धीति बुद्धिरात्मज्ञानमेव पर्यन्तो नाशो यस्य तस्मिन् संसारे मायामात्रं मायासंवलितं चैतन्यं विवर्तते अना-
त्मिके जगदाकारं प्राप्नोति अतो बुधो विद्वान् अनात्मिके शरीरादौ निरहंकारः तत्संबन्धिनि कलत्रादौ नि-
र्ममः अत एव निष्कामः अत एव शोभते दीप्यते कामानामनभिमानत्वात् ७३ अक्षयमिति अक्षयं अवि-
नाशिनं अत एव संतापरहितमात्मानं पश्यतो मुनेः क्व विद्या क्व शास्त्राणीत्यर्थः क्व च वा विश्वं क्व च देहः ३२

आत्मनस्सद्वैतानर्थनिष्ठत्विरित्युक्तं अस्य तच्चित्तनिरोधादीनपि कर्माणि कुर्वन् शोचनीय एवेत्याह नि
रोधादीनीति यत् यदि जडधीश्चित्तनिरोधादीनि कर्माणि जहाति न हि तत्क्षणात् तस्मादेव आरम्भमनो
रथान् प्रलापान् तत्क्षणे यावत् सर्वं आपाततः कर्तुं नाप्नोति प्रवर्तते तथा च मूढचित्तनिरोधादिकमपि
किंचित्कर इत्यर्थः ५७ मूढस्यात्मश्रवणमप्यनर्थकमित्याह मन्द इति मन्दो मूढस्तत्तदात्मवस्तु श्रु
त्वापि विमूढतां न जहाति मलिनचित्तस्य श्रवणेनापि तत्तान्नुदयात् अत एव मूढः यत्नात् बहिर्दृष्ट्या
निर्विकल्पोपि अन्तर्मनसि विषयलोलुपो भवतीत्यर्थः ५८ ज्ञानी तु लोकदृष्ट्या कर्म कुर्वाणोऽप्य

निरोधादीनि कर्माणि जहाति जडधीर्यदि । मनोरथान् प्रलापांश्च कर्तुमाप्नोत्यतत्क्षणात् ॥ ५७
मन्दः श्रुत्वापि तद्वस्तु न जहाति विमूढताम् । निर्विकल्पो बहिर्यत्नादन्तर्विषयलालसः ॥ ५८
ज्ञानाद्गलितकर्मा यो लोकदृष्ट्यापि कर्मकृत् । नाप्नोत्यवसरं कर्तुं वक्तुमेव न किंचन ॥ ५९
क्व तमः क्व प्रकाशो वा हानं क्व च न किंचन । निर्विकारस्य धीरस्य निरातंकस्य सर्वदा ॥ ६०
क्व धैर्यं क्व विवेकित्वं क्व निरातंकतापि वा । अनिर्वाच्यस्वभावस्य निःस्वभावस्य योगिनः ॥ ६१

कर्तेत्याह ज्ञानादिति यो ज्ञानाद्गलितकर्मा लुप्तक्रियाभ्यासः स लोकदृष्ट्या कर्म कदापि किंचन कर्तुमेव
अवसरं नाप्नोति अहं कर्म करिष्यामीति वक्तुमपि अवसरं नाप्नोति कर्मावसरस्तु दूरापास्त इति भावः ५९
विद्वांस्तु तमःप्रकाशादिकं न पश्यतीत्याह क्वेति धीरस्य ज्ञानिनः अत एव निर्विकारस्य निरस्तमोहादि
विकारस्य तमः क्व तमसोऽभावे च तन्निरूप्यप्रकाशो वा क्व निरातंकस्य कालादिभयशून्यस्य हानं च न क्व
इत्यर्थः यत्र रागादिशून्यमनास्तु किंचन किमपि आदानादिकं नापि क्व च न क्वापीत्यर्थः ६० ज्ञानी तु निर्वा
णस्वभाव इत्याह क्व धैर्यमिति योगिनो ज्ञानिनः
स्वभावस्य अत एव निःस्वभावस्य अत एव अनिर्वाच्यस्व
भावस्य धैर्यं क्व विवेकित्वं क्व निरातंकता निर्भ
यतापि क्वेत्यर्थः ६१ ॥

ग्रं. २२ ज्ञानिनस्तत्त्वदृष्ट्या स्वर्गनरकौ मोक्षादिकं किंचिदपि नास्तीत्याह नस्वर्ग इति स्पष्टः श्लोकः ८० ज्ञानिनश्चित्तं नप्रार्थना
नुतापादिविकाररहितत्वात् अमृतेनैव परमानन्देनैव पूरितमित्याह नैवेति लाभं न प्रार्थयते अलाभेन स्वर्वणा
यलाभेन वा नानुशोचति अत एव धीरस्य चित्तं अमृतेनैव परमानन्देनैव पूरितं सत् शीतलं अध्यात्मिकादितापरहि
तमित्यर्थः ८१ उक्तमेवार्थं पुनः पुनर्भङ्ग्यन्तरविशेषेण वर्णयति त्रिभिः निःस्पृहायाः सर्वोत्कृष्टत्वोपपादनाय नशा
न्तमिति निष्कामो विद्याकामकर्महीनो ज्ञानी शान्तं शमादिसत्त्वगुणयुक्तं न स्तौति नापि दुष्टं निन्दति तृप्तः सन्

नस्वर्गो नैव नरको जीवन्मुक्तिर्न चैव हि बहुनात्र किमुक्तेन योगदृष्ट्या न किंचन ८० नैव प्रार्थयते ला
'मू' भं नालाभेनानुशोचति धीरस्य शीतलं चित्तममृतेनैव पूरितं ८१ न शान्तं स्तौति निष्कामो न दुष्टम
पि निन्दति समदुःखसुखस्तृप्तः किंचित्कृत्यं न पश्यति ८२ धीरो न द्वेष्टि संसारमात्मानं न दिदृक्षति
हर्षामर्षविनिर्मुक्तो न मृतो न च जीवति ८३ निःस्नेहः पुत्रदारादौ निष्कामो विषयेषु च निश्चिन्तः स्वश
रीरेपि निराशः शोभते बुधः ८४ तुष्टिः सर्वत्र धीरस्य यथापतितवर्तिनः स्वच्छन्दं चरतो देशान् यत्रास्तमि

समदुःखसुखो भवति निष्कामत्वात् किंचित्कृत्यं न पश्यति ८२ धीर इति धीरो ज्ञानी संसारं न द्वेष्टि संसारादर्शि
त्वाद्बाधितानुसंधानाद्वा तथा आत्मानं न दिदृक्षति अपरोक्षसाक्षात्कारवत्त्वात् अत एव हर्षामर्षविनिर्मुक्त
स्तथा जीवनमरणादिरहितः सदैकरूपत्वादित्यर्थः ८३ निःस्नेह इति निराशो बुधः शोभते दीप्यते कीदृशः
पुत्रदारादौ निःस्नेहः प्रीतिरहितः विषयेषु निष्कामः भोगेच्छारहितः स्वशरीरेपि भोजनादिचिन्तारहितः ८४
तुष्टिरिति धीरस्य ज्ञानिनो यथापतितेन यथाप्राप्तेन वर्तते तिष्ठते तस्य यथापतितवर्तिनः सर्वत्र प्रारब्धप्राप्ते सुखदुःख
मसुखदुःखे निचयतुष्टिरात्मतोष एव तथा स्वच्छन्दं स्वेच्छया देशान् प्रारब्धवशात् नानादेशगह्वरतः यत्रैव वने वा नगरे
वा नसूर्योस्तमितस्तत्रैव शायिनः शयनं कुर्वतः ८५ ॥ २२

पततिति देहः पततु म्रियतां वा अथवा उदेतु जीवतु उभयथापि अस्य ज्ञानिनश्चिन्ता न भवति कीदृशस्य स्वभावो नाम निजात्मस्वरूपं स एव भूमिस्तत्र विश्रान्त्या विस्मृतसमस्तसंसारस्य ८६ अकिंचन इति केवलो निर्विकारो बुधो रमते कीदृशः अकिंचनता लिकिंचिन्मात्र परिग्रहीतं यस्य सः अकिंचनः अत एव कामचारो विधिनिषेधार्थ किंचित्करः स्वच्छन्दचारी अत एव निर्द्वन्द्वः सुखदुःखादिशून्यः छिन्नसंशयः छेदितसंशयस्तमः सर्वेषु भावेषु विषयेषु असक्तः संगशून्यः ८७ निर्मम इति धीरो ज्ञानी शोभते दीप्यते यतो निर्ममः अत एव समलोष्टाश्मकाञ्चनः ज्ञानबलेन स्वभिन्नो हृदयग्रन्थिरहंकारो यस्य सः तथा

पततूदेतु देहो वा नास्य चिन्ता महात्मनः स्वभावभूमिविश्रान्तिविस्मृताशेषसंसृतेः ८६

43 अकिंचनः कामचारो निर्द्वन्द्वश्छिन्नसंशयः असक्तः सर्वभावेषु केवलो रमते बुधः ८७

निर्ममः शोभते धीरः समलोष्टाश्मकाञ्चनः सुभिन्नहृदयग्रन्थिर्विनिर्धूतरजस्तमः ८८ ॥

सर्वत्रानवधानस्य न किंचिद्वासना हृदि मुक्तात्मनो वितृप्तस्य तुलना केन जायते ८९ ॥

जानन्नपि न जानाति पश्यन्नपि न पश्यति ब्रुवन्नपि न च ब्रूते को ऽन्यो निर्वासनादृते ९० ।

सर्वत्रेति विनिर्धूतरजस्तमसी यस्य सः ८८ सर्वत्र सर्वेषु विषयेषु अनवधानस्य एकाग्रतारहितस्य तथा न किंचिद्वासनेत्यादि मुक्तात्मनः कर्तृत्वाद्यध्यासरहितात्मनः अत एव आत्मानन्देन विशेषतृप्तस्य अस्य केन तुलना जायते ज्ञानिनां निविकल्पसमाधिवासाभावादित्यर्थः ८९ अतुलतामेव विशेषेण विशदयति जानन्निति निर्वासनात् ज्ञानिनः ऋते अन्यः कः लोके दृश्यामनसा जानन्नपि वस्तुतो न जानाति तथा चक्षुषा पश्यन्नपि वस्तुतो न पश्यति ब्रुवन्नपि न च ब्रूते कर्त्राभिमानाभावादित्यर्थः ९

अ॰ १८ भिक्षुरिति यस्य ज्ञानिनः उत्कृष्टेषु भावेषु शोभना अपकृष्टेषु अशोभनत्वावगाहिनी मतिर्गलिता अ
त एव यो निष्कामः स भूपतिर्वा याचकत्वल्पादिवत् शोभते एवं भावेषु निर्विकल्पत्वादाज्ञपेतस्य नव
धा ये स्मर्थः ९२ क्वेति योगिनो निर्व्याजनिष्कपटं यदार्जवं अकृत्रबुद्धिस्तद्रूपस्य आत्मनिष्ठत्वाच्चरि
तार्थस्य अन्वर्थनाम्नः स्वाछन्द्यं स्वेच्छाचारित्वं क्व तथा संकोचः प्रकृत्यादिसंवरणं क्व तत्वनिश्चयः क्व
कर्तृत्वं वा क्व कर्तृत्वाध्यासाभावात् अत एव निर्व्याजं यदार्जवं वक्रबुद्ध्यभावस्तद्रूपस्य ९३ आत्मे

भिक्षुर्वा भूपतिर्वापि यो निष्कामः स शोभते भावेषु गलिता यस्य शोभनाशोभना मतिः ९१
क्व स्वाच्छन्द्यं क्व संकोचः क्व वा तत्वविनिश्चयः निर्व्याजार्जवभूतस्य चरितार्थस्य योगिनः ९२
आत्मविश्रान्तितृप्तेन निराशेन गतार्तिना अन्तर्यदनुभूयेत तत्कथं कस्य कथ्यते ९३
सुप्तोपि न सुषुप्तो च स्वप्नेपि शयितो न च जागरेपि न जागर्ति धीरस्तृप्तः पदे पदे ९४
ज्ञः सचिंतोपि निश्चिंतः सेंद्रियोपि निरिंद्रियः सबुद्धिरपि निर्बुद्धिः साहंकारोनहंकृतिः ९५

ति आत्मनि विश्राम्या स्थितिमात् तृप्तेन अत एवाशारहितेन अत एव गतार्तिना गतदुःखेन ज्ञानिना यदंतःक
रणेनुभूयेत तत्कथं केन प्रकारेण धर्मम् आश्रित्य कथ्यते प्रकारस्य च धर्मस्याभावात् कस्य वा अधिकारिणः
कथ्यते तादृश्याधिकारिणोभावात् ९४ सुप्त इति धीरः सुषुप्तो न सुप्तः स्वप्नेपि शयितो न ज्ञा
गरेपि न जागर्ति अवस्थात्रयातीयातु बुद्धिस्तद्विविक्तात्मज्ञानत्वात् इदमेवाभिप्रेत्याह पदे पदे क्षणे
क्षणे अविरते निरंतरं आनंदानुभवतृप्तः ९५ ज्ञ इति यो ज्ञानी लोकदृष्ट्या चिंतादिसहितोपि वस्तुतस्तद् २८

नसुखीति लोकगम्यासुखीमादिरूपोपि वस्तुतस्तत्वग्रंतःकरणाध्यासरहितत्वात् न विरक्तो विषयद्वेषाभा-
वात् न वा मुक्तः शुद्धमपि बंधनाभावात् तथा अकिंचनः सदेकरूपत्वात् तथा किंचिदपि न च अनिर्वाच्यत्वात् ८९
विक्षेपपीति धर्मोत्वानी लोकदृष्ट्या विक्षेपोपि वस्तुतो न विक्षिप्तः स्वप्रकाशात्मानुभावात् लोकदृष्ट्या समाधौ
प्रतीयमानेपि न समाधिमान् समाधिकर्तृत्वाभावात् लोकदृष्ट्या जाड्ये प्रतीयमानेपि न जडः स्वानु-
भवशालित्वात् लोकदृष्ट्या पांडित्ये प्रतीयमानेपि न पंडितः पंडितोहमित्यभिमानाभावात् ९० मुक्त इति
मुक्तः प्रारब्धवशाद्यथा प्राप्तास्थितो स्वस्थो नयिस्तस्य चिन्नः तथा कृतं नेष्टं वेक्त नेकर्तव्यं वकारिष्यमाणे कर्मणि
न सुखी न च वा दुःखी न विरक्तो विरागवान् न मुमुक्षुर्न वा मुक्तो किंचेनो न च किंचन ८९ ॥
विक्षेपेपि न विक्षिप्तः समाधौ न समाधिमान् जाड्येपि न जडो धन्यः पांडित्येपि न पंडितः ९० ॥
मुक्तो यथास्थितिस्वस्थः कृतकर्तव्यनिर्वृतः समः सर्वत्र वैतृष्ण्यान्न स्मरत्यकृतं कृतं ९१ ॥
न प्रीयते वंद्यमानो निंद्यमानो न कुप्यति नैवोद्विजति मरणे जीवने नाभिनंदति ९२ ॥
न धावति जनाकीर्णं नारण्यमुपशांतधीः यथातथा यत्रतत्र सम एवावतिष्ठते ९३ इतिशांति शतकं ॥
ईत्नः संतुष्टः अभिनिवेशाद्वेषशून्यः अत एव सर्वत्र समः वैतृष्ण्यात् इदमकृतमिदं च कृतमिति न स्मरति ९१
न प्रीयत इति केश्चित्स्तूयमानो न तुष्यति निंद्यमानो न कुप्यति मरणउपस्थिते सति उद्वेगं न प्राप्नोति
आत्मनो नित्यत्वानुसंधानात् अत एव जीवने सति नाभिनंदति ९२ न धावतीति उपशांतधीः पुरुषो ज-
नाकीर्णं प्रदेशं नानुधावति नाप्यरण्यं सर्वत्रैव ब्रह्मत्वात् यथा तथा जनसंमर्देन तदसंसदप्रकारेण वा यत्र
तत्र वने वा पत्तने वा सम एव स्वस्थचित्त एवावतिष्ठते आत्मान्यसत्ताकारत्वात् ९३ इतिश्रीमहेश्वरवि
रचितायामष्टावक्रटीकायां शांतिशतकप्रकरणमष्टादशकं १८ ॥

साध्यसाधनरूपेण ज्ञाते ज्ञाने गुरोर्मुखात् शिष्यः स्वात्मनि विश्रान्तीमष्टभिः आह संपुटैः । १ एवं तत्त्वज्ञानिनः
स्वभावभूतां शान्तिं श्रुत्वा स्वकृतार्थतया गुरुरूपितो वर्णितमात्मविश्रान्त्यष्टकं शिष्यः स्वयमाह तत्त्वेति हे गुरो
मया भवतः सकाशात् तत्त्वज्ञानोपदेशमादाय स्वहृदयोदरात् नानाविधपरामर्शरूपः शल्यस्य उद्धारः
अपहारः कृतः । १ तदेव स्पष्टयति क्व धर्म इति धर्मार्थकामा अपि हृदयोदरात् निरस्ताः तयि स्वत्वादेरर्थः
स्वमहिम्नि स्थितस्य मम अविवेकिता क्व द्वैतं वा द्वैतं च क्व चिन्मात्रे विश्रान्तस्य अविवेकानुपयोगात् उत्तीर्ण
तया परे पारे नौका यथा किं प्रयोजनमिति न्यायात् द्वैतं स्यात् ज्ञानबाधितत्वात् अद्वैतं न स्याद्द्वैतमापेक्षत्वेन

तत्त्वविज्ञानसंदंशमादाय हृदयोदरात् नानाविधपरामर्शशल्योद्धारः कृतो मया १
क्व धर्मः क्व च वा कामः क्व चार्थः क्व विवेकिता क्व द्वैतं क्व च वाद्वैतं स्वमहिम्नि स्थितस्य मे २
क्व भूतं क्व भविष्यद्वा वर्तमानमपि क्व वा क्व देशः क्व च वा नित्यं स्वमहिम्नि स्थितस्य मे ३
क्व चात्मा क्व च वानात्मा क्व शुभं क्वाशुभं तथा क्व चिन्ता क्व च वाचिन्ता स्वमहिम्नि स्थितस्य मे ४
क्व स्वप्नः क्व सुषुप्तिर्वा क्व च जागरणं तथा क्व तुरीयं भयं वापि स्वमहिम्नि स्थितस्य मे ५

स्वाभाविकत्वात् द्वैताद्वैतयोरपि मम न सत्तेत्यर्थः २ क्व द्वैतमित्युक्तमेव विशेषतः प्रपञ्चयति क्व भूतमिति का
लस्यापि मम अस्पृष्टत्वेन तदुपाधिका भूतभविष्यद्वर्तमाना अपि न सन्तीत्यर्थः नित्यं स्वमहिम्नि स्थितस्य
मम देशोऽपि नास्तीत्यर्थः ३ क्व चात्मेति अत्र नित्यमात्मेतीत्यात्मास्तु व्याप्यमपदस्य कथ्यते न स्वमहि
म्नि स्थितस्य च मम आत्मादिकं नास्तीत्यर्थः ४ क्व स्वप्न इति स्वप्नादयो बुद्धेरेवावस्थास्ता मम न सन्तीति एतन
त्रितयाभावेन तत्त्रिरूपं तुरीयावस्थापि मम नास्ति तथा भयादयोऽन्तःकरणधर्मा मम न सन्तीत्यर्थः ५ ३५

ॐ श्रीगणेशाय नमः ॐ श्रीरामचरणद्वंद्वं जगद्वंद्यैकवेदिने । वंदे भक्तापयानंदं सच्चिदानंदमद्वये ॥
श्रीशंकरवचोगंगासंगमेन निजं वचः । पवित्रयितुमेवैतां षट्पदीं विवृणोम्यहं ॥ २ समस्तविद्याप्र
वर्तकः समस्तपुरुषार्थसाधकः परमकारुणिकः श्रीमहेश्वरः समस्तवेदार्थं वैनायिका
वैनाशिकादिभिस्तमः प्रवृत्तेर्व्याकुलमाकलय्य श्रीशंकराचार्यरूपेणावतीर्य तमेव वेदार्थं नानो
पनिषदादिभाष्येषु विस्पष्टं प्रकाशयामास तेन च वेदार्थं नानाग्रंथेषु विवृतिमपि बालत्वषट्प
द्यां निबबंध तामिमां षट्पदीं काशीवासी समस्तविद्यापारदृश्वा श्रीश्रीरामभट्टमिश्रो विवृण
ते । तत्र षट्पदीस्तोत्रे प्रथमश्लोके एव स्तुतिर्न प्रतीयते इति चेन्न विष्णो इति संबोधनेन विष्णु
पदेन व्यापित्वसत्तासन्नविशेषगुणकीर्तनेन स्तुत्यायाः स्तुतेः प्रतीतिः विष्लृ व्याप्ताविति धा
तुः विवेष्टि कृत्स्नं जगत् व्याप्नोतीति विष्णुः ततः क्रियाशब्दोऽयं क्रियाप्राधान्येन प्रतीयते क्रि
याश्च यस्याः प्राधान्येन प्रवर्तते यत्र भिक्षुकसेवकपाचक इत्येवमादिसंबोधनेषु भिक्षुसे
वापाकादिरूपक्रियाकीर्तनेन निंदावज्जगद्व्याप्तिरूपगुणवर्णनरूपस्तुतिप्रतीतिरस्त्ये
व विष्णुशब्दश्च व्यापकपदार्थवाचकः स च परमात्मैव नान्य इति व्यापकदिक्कालाकाशाद इ
ति चेन्न तेषां कार्यत्वेन स्वात्मन आकाशः संभूत इत्येवमादिश्रुतिप्रमाणात् तथा च प
रमार्थस्तत्र न विपर्ययः कृते अलमतिप्रसंगेन प्रकृतमनुसरामः सर्वगुणापहारित्वेन महादोष

[illegible]

[illegible]

वेयतोः विनयस्य तत्तत्स्वभावं प्रार्थयते श्रीशंकरः हे विष्णो परमात्मन् अविनयं उद्विनी
तनास्यपनय दूरीकुरु प्रार्थने चात्र लोट् प्रत्ययः दानमनादानमव्याप्तिः इति सर्वं व्याप्नोतीति विष्णुः अतोम
नोऽस्मनं प्रार्थयते दमय मन इति मनः दमय वशं नय अत्र कृतत्वे विषयमृगतृष्णां शमय इति मनो दीनभव
त्यातोविषयाः सक्तभावं प्रार्थयते विषया एव मृगतृष्णा ... विषयरसास्तेषु तस्याश
मय उपरमय प्रमापमेव स्तनीकृत्य तस्या यद्वा विषयरसो विषयप्रीतिस्तत्र तस्याश्च वि
नयापनयेऽन्तरमाह भूतेति भूतेषु जीवेषु दया तां प्रार्थयते स्पष्टः [illegible] विस्तार
अविनयमपनय विष्णो दमय मनः शमय विषयमृगतृष्णां भूतदयां विस्तारय तारय संसार
सागरतः १ दिव्यधुनीमकरन्दे परिमलपरिभोगसच्चिदानन्दे श्रीपतिपदारविन्दे भवभयखे
दच्छिदे वन्दे २॥ यविष्णो तां कुरु दयालुः हि सर्वत्र विनीतो भवति एवं प्रार्थितदानेन त्वानन्दा
...रमदीये संसारे निवर्तयेति प्रार्थयते तारयेति संसारः सागर इव संसारसागरस्तस्मादिति संसार
सागरतः तारय पारं नय अस्मान् येनार्थः अत्र हि अविनयापनयादि प्रार्थनापञ्चकं विषयत्वेना
श्रीविष्णोः परमात्मनः पाठान्तरयोस्तु तिरष्कृत्य नीति बाधका निःस्पृहेनोऽपि प्रार्थ्यते इति २ ॥
नु प्रार्थनामात्रेण कथं संसारनिवारणं स्यादित्याकाङ्क्षायां संसारनाशनं साधनं भगवद्भक्तिं वि
पदे श्रीपतिपदारविन्दे हं वन्दे नमस्करोमि श्रीपतिपदारविन्दे श्रियः पतिः श्री
पतिस्तस्य पदारविन्दमिति तथा श्रीपतिपदारविन्दे पुरुषार्थप्रदत्वेन विशिनष्टि भवभयेति भवाङ्क

ष॰ २ यं वेदस्य तपोऽस्त्विदाच्छेदनं याभ्यां ध्यानमात्रेणेत्यर्थः ॥ अरविन्दसादृश्यार्थं पुनर्विशिनष्टि पदद्वयेन
दिव्येति दिवि भवा दिव्या सा चासौ धुनी चेति दिव्यधुनी गङ्गा सा मकरन्दो ययोस्ते तथा परिमलपरि
भोगः सच्चिदानन्दो ययोस्ते तथा मनोहारितेनानाभेदोपचारः परिमलपरिभोगः सौरभ्यः विस्तारः
सच्चासौ चिच्चासावानन्दश्चेति तथा आनन्दयतेनावन्मात्रवत्कण्ठेने यायिकामितसत्त्ववज्ज्र
तात्प्रसत्येतनन्ज्ञानत्यर्थे चिदिति तथानन्दे वा नित्यतापि प्रसत्ये तनन्ज्ञानत्यर्थे सदिति सच्चि
दानन्दो ब्रह्म सर्वविशोपतिपदारविन्दयोः सच्चिदानन्दस्य च यद्यपि न भेदस्तथापि भेदारोपेण
वस्त्रीहितेष्ठव्यः यद्वा परिमलपरिभोगेन सता भक्तानां चिदानन्देन तात्तत्स्वल्ययाभ्यां ते परिमल
परिभोगेन भक्तानां ज्ञानसत्त्वजनके इत्यर्थः २ ननु जीवेश्वरयोः परमार्थतो भेदे सति केन

सत्यपि भेदापगमे नाथ तवाहं न मामकीनस्त्वं सामुद्रो हि तरङ्गः क्वचन समुद्रो न तारङ्गः ३
विशेषेण जीवः सेवक एव परमेश्वरः सेव्य एवेत्यपेक्षायां जीवेश्वरयोर्भेदको विशेषो दर्शयन्नभ
गवन्तं स्तौति सत्यपि भेदापगम इति एकमेवाद्वितीयं ब्रह्म नेह नानास्ति किंचनेत्येवमादिश्रुति
षत्स्व विचार्यप्रमाणेन वस्तुतो भेदो नास्त्येव तथाप्यविद्यादशायां सविद्याजनितानां भेदानां
भेदानुभवे सति नाथ न नाथुना ध्यायचोपनाय्य सर्वज्ञत्वात्पीठ इति पाठः नाथेति बुसाणमारभ्य पिपीलि
कापर्यन्तानामीशः इति तथाहं नाथ परमेश्वर तवैवाहं परमेश्वरस्याहमेवांशोऽस्मि अंशभावमीतिशे
षः सत्यभेदे कदाचित्परमेश्वरेणांशत्वेन सत्येन न त्रिवारणाद्ध मामाहं न मामकीनस्त्वं मम वं मे शोते

पि

53

भेदावगमे सत्यंशांशींशांशिनव्यवहारावगम इत्यर्थः वशीकृतमायत्वेन परमेश्वरे मायावश्यत्वे च जीवे विशेष इत्यभिप्रायः जीवेश्वरयोरंशांशिभावे यथाग्नेर्विस्फुलिंगा व्युच्चरन्तीत्येवमादिश्रुतिरेव प्रमाणं न वेन्यत्र षष्ठी संबंधे स च संबंधोंऽशांशिभाव एव एतदेव स्पष्टं तेन द्रढयति सामुद्रेति समुद्रस्यांशस्तरंगः क्वचन कस्मिंश्चिद्देशे काले वा नारंगस्यांशः समुद्रो नेत्यर्थः हिशब्देनास्य प्रसिद्धिं द्योतयति सत्यपि भेदापगम इति पाठे वस्तुतो भेदापगमे भेदाभावे सत्यविद्यादशायां भेदारोपेणांशांशिव्यवहारे नमामकीनस्त्वमिति व्यवहार इत्यर्थः अनेन श्लोकत्रयेण समन्वयसाधनाविरोधाध्यायत्रयार्थाः संक्षेपेणोक्ता द्रष्टव्याः तत्र विरोध इति पदे न समन्वयश्च पूर्वेण श्लोकद्वयभागेन साधनं तृतीयश्लोकेन चाविरोध इति विवेकः ॥ ३॥

उद्धृतनगनगभिदनुजदनुजकुलामित्र मित्रशशिदृष्टेदृष्टेभवतिप्रभवतिभवति किंनभवतिरस्कारः ४॥

अधुना चतुर्थाध्यायार्थं संक्षेपेण दर्शयन् बहुधा संबोधयन् भगवंतं स्तौति हे मित्रशशिदृष्टे भवति त्वयि दृष्टे साक्षात्कृते सति भवतिरस्कारः संसारोन्मूलनं किं न भवति अपि तु भवत्येवेत्यन्वयः तथा च श्रुतिः भिद्यते हृदयग्रंथिश्छिद्यंते सर्वसंशयाः क्षीयंते चास्य कर्माणि तस्मिन्दृष्टे परावरे इति मित्रः सूर्यः शशी चंद्रस्तौ दृष्टी यस्य तत्संबोधने तथा भगवंतं विशिनष्टि प्रभवति प्रकर्षेण भवति विद्यत इति प्रभवत् तस्मिन्सर्वोतयो

ध० २

मिणीत्यर्थः अत्र तेन गोयमलार्जुनौ येन कृपया सउत्तनन गतस्तत्संबोधनं तेन तथा यद्वा अद्य तेन गोगो
वर्द्धनो येन स तथा तत्संबोधनं तेन तथा एतेन भक्तवत्सलत्वं भगवतो दर्शितं तेन गान् पर्वतान् भिनत्तीति
नगभित् इन्द्रस्तस्यानुजो वामनः दनुजा दानवास्तेषां कुलं समूहं तस्यामित्रं शत्रो दनुज शत्रुस्तेन दैत्या
दयोपि रक्ष्यंते एतेन दुष्टनिग्रहेण भगवतः पालकत्वमुक्तं ४ एवं भगवतस्सर्वाभुवनरपि भक्तपा
लनैकस्वभावत्वेन भगवतस्सर्वस्तं स्वरूपं प्रार्थयते मत्स्यादिभिरिति हे परमेश्वर भवतो हे परि
पाल्य त्वं ह्य त्वन्वयः ननु रक्षणमनिष्टनिवारणं तत्त्वे किमनिष्टं यस्य निवारणं मया कार्यं
मत्स्यादिभिरवतारैरवतारवतावनाद्यखिलवसुधां परमेश्वर परिपाल्य भवता भवताप
भीतोहं ५॥ मित्यपेक्षायामाह भवेति भवः संसारस्तत्र तापः कामक्रोधादिजन्यो निरं
तरं हृदयदाहस्तस्मात् भीतोहं भवभीतभीतिरिति वाच्यमिति वक्तव्यान्ये च भीसमासोत्र तव
च भक्तपरिपालनस्वभाव एवेत्यभिप्रायेण भगवतो विशिनष्टि अखिलवसुधामवता रक्षिता
हि प्राहः पुराणप्रसिद्धिमाह अवतारहेतिमस्तुचयिते एव विशिनष्टि मत्स्यादिभिरवतारैरवता
रवतारीकृतानाम्र वतारेणानेन पत्रेणाहं पत्रीति वदत्युत्नीयामाचरत्यो ५॥ अथ भगवंतं
कथासंबोध यत्कालानत्यं भावं प्रार्थयते हे दामोदर मे परमं दरं कालाद् भयमपनय त्वन्वयः
कदाचित्कस्मिंश्चिदपराधे यशोदया दाम्ना उदरे बंधनाद्दामोदरे यस्य स तथा तत्संबोधनं तथा अ २

नेन भक्तवत्सलतादर्शिना भगवतः गुणानां सर्वज्ञत्वसकलजगत्प्रियत्वपरमकारुणि
कत्वादीनां मंदिरमिवाश्रयो गुणमंदिरं तत्संबोधनं तथा सुंदरं वदनारविंदं यस्य तत्तथा तत्
संबोधनं तथा गां विंदते स्वामित्वेन लभते इति गोविंदस्तत्संबोधनं तथा अनेन भगवतो जगत्पा
लकतादर्शिना भवजलधिमथने मंदर इवावलोडनहेतुर्भवजलधिमथनमंदरस्तत्संबो
धनं तथा अनेन भगवतो भक्तमोचकतादर्शिना कालभयस्य परमतं योगतयादिभिस्थ
निवार्यत्वात् ९ एवं षट्पद्या भगवंतं संस्तूय इदानीं पुरुषार्थचतुष्टयसाधकषट्पदीप

55 दामोदर गुणमंदिर सुंदरवदनारविंद गोविंद भवजलधिमथनमंदर परमं दरमपन
यत्वं मे ९ नारायण करुणामय शरणं करवाणि तावकौ चरणौ इति षट्पदी मदीयवद
नसरोजे सदा वसतु ९ इति षट्पदीस्तोत्रं शुभं ॥ ठनमिति सूचयन्भगवच्चरणध्याने
न सर्वं केषट्पदीपठनं च प्रार्थयते नारायणे जीवानां समूहो नारस्तस्यायनं महतीति यस्मात्स
नारायणस्तत्संबोधनं तथा अज्ञादर्पीयथामलप्रतीयते तथा परमेश्वरः कल्पिते जीवसमूहे प्र
तीयते इति जीवसमूहाश्रयत्वमुच्यते अत्रक्रमेण उत्पत्तित्रयेण नारायणशब्देन सर्वांतर्यामी सर्व
साक्षी सर्वाश्रयश्च कथ्यते एवं पदार्थं ज्ञापयामि इति सूत्रेण नकारस्य णः इ ९ अको करुणामय करुणा
प्रचुर विस्मीनाव कौ चरणौ करवाणि हृदि स्थापयामीत्यर्थः चरणौ विशिनष्टि शरणमाश्रयो
रक्षको वा एकवचनांतोपि शरणशब्दो द्विवचनांतस्य चरणशब्दस्य विशेषणं वेदः प्रमाणमि

ष ४ त्वत्र यथाश्रवत्कथातः स्थापनार्थं पादौ हस्तौ करभाजने इहार्थेन इत्येवमादिप्रयोगेन तथा
दर्शनात् यद्वा करणार्थ एव कथातः तथा नैवयानुपपत्तिर्न हि चरणयोः कर्मत्वं संभवती
ति चेन्न सविशेषणे विधिनिषेधौ विशेषणमुपसंक्रामत इति न्यायेन स्वर्गोस्यामित्यत्रेव विशे
षणीभूताश्रयणक्रियायां रक्षणक्रियायां वान्वयोपपत्ते एव चरणध्यानपूर्वकं षट्पदीपठनं
प्रार्थ्यते इतीति इति पूर्वोक्तापक्षेते गम्यते यौ प न इति पदानि श्लोकाः षण्णां पदानां स
माहारः षट्पदी यथा षट्पदी भ्रमरी स्वीयस्थैर्येण सरोजे वसति तथेयं षट्पदी मदीयषट्पदी
कर्तृ मे मन्वदनसरोजे सदा वसतु प्रार्थनाया लोट् एतेन भगवच्चरणध्यानपूर्वकषट्पदी
पठनेन पुरुषार्थचतुष्टयपर्यवसायीति सूचितं भवति ननु नेयं षट्पदी किंतु सप्तपदी नारा
यणकरुणामयेति श्लोकेन सप्तश्लोकत्वप्रतीतेः सत्यं नारायणेति श्लोकस्य फलस्तुति
परत्वेन बहिर्भूतत्वादिति षट्पदीत्वमेव आर्या च श्लोक एव आर्यालक्षणं च यस्याः प्रथ
मे पादे द्वादश मात्रास्तथा तृतीयेपि अष्टादश द्वितीये चतुर्थे पंचदश सार्यति ७ ॥ इति॥
श्रीसर्वविद्यापारदृश्वना श्रीरामभट्टमिश्रेण विरचितं षट्पदीस्तोत्रविवरणं संपूर्णम् शुभं

सं १९ २ द्वि श्रावणशुदि षष्ठ्यां परतागमर्व्यां गुरुवासरे समाप्तोयं

४

57

म॰ १

ॐ श्रीगणेशाय नमः श्रीमद्यतीन्द्रमानम्य जगन्नाथमुनिं गुरुं मनीषापंचकं व्याख्या तन्यते मधुमंजरी १ तत्रा-
दौ कथा निरूप्यते कदाचिच्छंकराचार्यः काशीपतिपुरीं ययौ तस्य ज्ञानपरीक्षार्थं कश्चिद्देवः समागतः २॥
चंडालरूपिणं दृष्ट्वा गच्छ गच्छेति चाब्रवीत् तथाकृते तमाचार्यं स देवः पुनरब्रवीत् ३ तत्राद्याह अन्नमयेति
अस्यायमर्थः अद्यते यज्जनैस्तदन्नमन्नाद्भवतीति च भूतानि यत्तदन्नं अद भक्षण इति धातोरन्नशब्दस्यान्नत्वात्
अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यत इति श्रुतेश्च तदन्नमयस्तत्प्रधानस्तद्विकारो वा स्थूलदेहोऽन्नमय इ-
त्युच्यते तस्मादन्नमयाद्ब्राह्मणजातिविशिष्टाद्धि अन्नजातिविशिष्टाद्वा अन्नमयमन्नलक्षणं स्थूलदेहमस्य ते
ब्जातिविशिष्टं दूरीकर्त्तुं ते हरतः परिहरणार्थं हे द्विजवर जन्मना जायते शूद्रः कर्मणा जायते द्विजः वेदाध्य-
यीभवेद्विप्रो ब्रह्म जानातीति ब्राह्मण इति स्मरणात् द्विजानां हि जन्मना कर्मणा च वरः श्रेष्ठस्तेन कर्मनिरर्थः वोरुसि॰

अन्नमयादन्नमयमथवा चैतन्यमेव चैतन्यात् द्विजवर दूरीकर्त्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छेति १

गच्छ गच्छेति वचसा वाञ्छसि त्वमपि तव मनसि मनःपूर्वकत्वाद्वाग्व्यापारस्य यद्धि मनसा ध्यायति तद्वाचा वदति॥
वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमित्यादिश्रुतिभ्यो वाग्व्यापारस्य मनोव्यापारपूर्वकत्वसिद्धेर्न
उक्तं भाष्यकृता श्रीविष्णुसहस्रनामभाष्ये मनसा वाचा संकल्प्य तत्पश्चाद्वाचा व्याहरतीति यद्धि मनसा ध्याय-
ति तद्वाचा वदतीति श्रुतिभ्यः संस्मरणं ध्यानं च नामकीर्तनेन तन्मतमिति किं ब्रूहीति काकुस्वरूपेणाक्षेपः पता
तरमवलंबयन्नथवेति अथवाऽन्नचैतन्यमेव चैतन्यात् भिन्नं चेतनं स्याद्द्वितीयत्वेनाखिलभेदस्यानंगीका-
रेण ज्ञातेरंगीकारात् चैतन्यकूटस्थरूपं प्रतिबिंबरूपमवच्छिन्नरूपमेव नान्यत् तादृशादेव चैतन्यात् प्र-
वोक्तो भयजातिविशिष्टस्थूलदेहात्तवेति नो दूरीकर्त्तुं वाञ्छसि किं ब्रूहि गच्छ गच्छेति पूर्ववदनुषज्यते १
एवं द्वेधा विकल्प्य द्वितीयविकल्पमाक्षेप परिहरन्प्रतिबिंबावच्छिन्नचैतन्याभ्यां तयोश्चैतन्ययोर्दूरीकरणेच्छा

85

किमिति गंगांतु निस्त्रार्यावर्तेतत्रैकाश्मादिपुण्यनगरप्रान्ते देवतामनोहारिणीविस्मयदोऽद्भवा भागीरथीजाह्न
वीत्यपरपर्यायनाम्नी विलसती गंगा तस्याः सर्वपापक्षयकरंपरंपरया मोक्षप्रापकं च पदं तु जलेतास्मिंश्च
रमणीश्चैवरेनभस्मिमणिर्विदीप्यते अतिशयेन विराजमानता रेवरमणिः सूर्यस्तास्मिन्विंबिते प्रतिबिंबिते
सति प्रतिच्छायया दृश्यमाने सतीतियावत् नत्वेवं चेडलवाटीपयः पूरे चंडालाः स्वपचास्तेषां वाटीवीथी
तस्यां पयः पूरे च म्लेच्छोदनादिना डुर्गंधं मलिनेजले तास्मिन्विंबिते सती त्यज्यते अंतरं भेदोस्ति वि
भृते किमित्याक्षेपः उभयत्रापि योज्यः नांतरमनुभूयते विहृदः विद्वत्साम्यं पीत्वा तेन्तरमित्रायः एवं प्रति
बिंबपक्षांगीकारे भेदभ्रमस्यानवकाशं प्रदर्श्यावच्छिन्नपक्षेपि तं दर्शयति कोचनेति कोचनेन स्वर्ण
न निर्मिता घटी कुंभः कोचनघटी मृदा सिद्धया गंधादिगुणवत्या निर्मितः कुंभो मृत्कुंभस्तयोस्ताभ्यामव
59 किं गंगांतु निर्विबिंते वरमणौ चंडालवाटीपयः पूरे वांतरमस्ति कोचनघटी मृत्कुंभयोर्वांबरे ॥
च्छिन्नमाकाशं तन्मंबरेनभो यत्तस्मिन्नंबरेंतरमस्ति किमित्याक्षेपः नास्त्येवेति तात्पर्यं अत्रोभयपक्षयोः प्रति
बिंबयोरवच्छिन्नयोर्वा बिंबेनाऽनवच्छिन्नेन प्रतिबिंबाभ्यामवच्छिन्नाभ्यां वा बिंबस्याऽनवच्छिन्नस्य प्रतिबिंबयो
रवच्छिन्नयोर्वा परस्परं न कदाचिद्भेदगंधस्यावकाशः व्यवहारभेदस्योपाधिपरामर्शमंतरेणाविभाव्यमानत्वात्
विचाराभावजीवनस्य हेतुर्मिथ्याभ्रमस्य विचारवह्निनैवस्त्वत्तमवसीयते किं तु विचाररहितकले रेव त्वत्तो विचार
वताभवता कथमुच्यते गंगाद्यन्याभिप्रायः संप्रति दृष्टान्ते सोपाधिकयोरन्योन्यमनुपाधिकेन ताभ्यां तस्य च भे
दाभावेपुपाधिभूतयोरार्यावर्त्तादिपुण्यापुण्यदेशयोरथ च तत्स्य गंगादिपुण्यापुण्यजलयोर्भेदस्य विद्यमान
त्वान्न दार्ष्टान्तिकेपि विप्रत्वादिप्रवजातिविशिष्टयोः स्थूलदेहयोर्लक्षत्सकारनंदभावविशिष्टयोरंतःकरण
योस्तद्भेदस्यानुभूतत्वात् विप्रत्वजातिविशिष्टेन स्थूलकारणेन देहेन दत्तवंत्यंतः करणाभ्यां तज्जातिरहितेन तस्य का
रणेन देहेन दत्तवंत्यंतः करणयोर्हेतूरीकरणच्छायुक्तेवेति वदता शांकितं रेवभुजनरप्यध्यस्तमपचाविप्रेरपर =रहिते

क५२

म० २ मात्मनि विज्ञाते न किंचिदन्यद्विज्ञेयमस्तीति यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदित्यादिश्रुतिमवष्टभ्य सर्वात्म-
कत्वमात्मनोऽनुभवन्नुपाधिदृष्ट्यापि न तद्दृष्टिकोणादिना दृषिष्यत इति प्रथमविकल्पं परिहरति प्रत्यगिति प्रातिलो-
म्येन मिथ्याध्यस्तं सर्वं प्रपंचं वैलक्षण्येनाञ्चति प्रकाशत इति प्रत्यक् परमात्मा स च वस्तु च तत्र ध्यस्तानां स्वभाव-
त्वेनेति कस्मिन् समस्तवस्तुष्वधिष्ठानभूते तस्मिन् प्रत्यग्वस्तुनि किंच निर्गतः प्रपंचरूपस्तरंगो यस्मात् सहजानंदा- ३
वबोधाम्बुधेः सहजः स्वभावः आनंदः सुखं अवबोधः स्फुरणं स्वभावभूतो न केनापि निर्वर्तित आनंदश्चासाववबोध-
श्चेति सहजानन्दावबोधः स एवाम्बुधिरिवाम्बुधिरपर्यन्तत्वात् तस्मिन् निस्तरंगसहजानंदावबोधाम्बुधौ प्रत्यग्व-
स्तुन्यहमहमित्यनुभूयमाने सतीति शेषः विप्रोऽयं हि ज्ञातिरध्ययनशीलः श्वपचोऽयं चंडालः पशुघातक इति
चैयतापरिच्छेदरूपोऽयं विभेदभ्रमो हेतुभ्रान्तिकः कुतः संभवति न कुतोऽपीत्यर्थः प्रत्यगेकरसस्य वस्तुनो निष्प्र-
पंचोक्तेरिति भावः २ एवं केवलपारमार्थिकदृष्टिमवलंब्यादिमः सत्राचार्यो यदेव स्तारकोपदेशार्णोऽन्वेषा

प्रत्यग्वस्तुनि निस्तरंगसहजानंदावबोधाम्बुधौ विप्रोऽयं श्वपचोऽयमित्यपि महान्कोऽयं विभेदभ्रमः २ जाग्र- ७१
त्स्वप्नसुषुप्तिषु स्फुटतया या संविदुज्जृम्भते याब्रह्मादिपिपीलिकान्ततनुषु प्रोता जगत्साक्षिणी सैवाहं न च
"स्तिचेत्सासंविद् इतिपाठभेदः दृश्यवस्त्विति दृढप्रज्ञापि यस्यास्ति चेत्" चंडालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम २ ॥

विश्वस्वरोऽभविन्नमर्हतीति निश्चित्य यथोक्तमेवेतत् एतद्दृष्टिमनुभवाद्दृशोऽनुसाके चंडालत्वादिप्रतीतिरि-
त्यभिप्रेत्य जाग्रदित्यादिभिः पंचभिः श्लोकैः स्वानुभवं निरूपयति तत्र तावच्चतुर्षु वेदेषु यानि प्रसिद्धानि प्रज्ञा-
नं ब्रह्म अहं ब्रह्मास्मि तत्त्वमसि अयमात्मा ब्रह्मेत्येवंरूपाणि क्रमेण ऋग्यजुःसामाथर्वणोपनिषद्गतानि
महावाक्यानि तदर्थं तावत्क्रामति जाग्रदित्यादिना अस्यायमर्थः यस्याधिकस्यापि स्वरूपविशेषस्य दृढप्रज्ञास्ति
चेत्स तु श्वपचश्चंडालो वास्तु द्विजो वास्तु गुरुरित्येषा मम मनीषेत्यन्वयः अत्र सैवाहं न च दृश्यवस्त्विति प्रज्ञायाः प्र-
कारकः स्फुटतरेति संविदः सर्वप्रसिद्धिर्द्योतनार्थं ज्ञानामीत्यादिसंव्यवहारेषु प्रज्ञानस्य विजृम्भमाणत्वा- २
त्मतानानुभवविहीनस्य लोष्टवज्जडसमात्कोतेः पाषाणादिविचारेऽनपेक्षार्थं वा स्फुटतरेति संविदा नाम

ⵊ तास्थिता॥

61

तत्वमुच्यते तस्याः सर्वाधिष्ठानतया सर्वप्रकाशत्वेनावरणाज्ञानस्यापि भासकत्वात् ॥ तमेव भान्तमनुभा-
ति सर्वमित्यत्र श्रुतौ सर्वशब्देनावरणस्यापि विवक्षितत्वात् चैतन्यप्रसिद्धिर्या ननु तद्यच्छेदेन भवति ना-
न्यच्छेदेन चैतन्यस्य प्रसिद्धिर्विवक्षिता चेत्तर्हि सा प्रसिद्धिः केत्याकांक्षायामाह जाग्रत्स्वप्नसुषुप्तिषि
ति इन्द्रियैरर्थोपलब्धिर्जागरितं करणेषूपसंहृतेषु जागरितसंस्कारार्थः प्रत्ययः सविषयः स्वप्नः सर्वप्रका-
रज्ञानानामुपसंहारो बुद्धेः कारणात्मनावस्थानं सुषुप्तिरित्येवंलक्षणा जाग्रदाद्यवस्थाः प्रसिद्धा तासु प्र-
सिद्धास्ववस्थासु संविदपि प्रसिद्धा नन्वेवं प्राकृतपरिश्रमाणां संवित्त्वसिद्धिरस्तु निर्विकल्पानां कथमिति
चेदुच्यते प्राकृतानामव्यवहृतत्वादिति संविन्मात्रज्ञाने चैतन्ये बोधः साक्षी कुतस्तस्याः स्वयमात्मेत्येवंप्रकारकैः श्रु-
तैर्व्यवहृतमसंस्कृतानामपि देशभाषादिसांकेतिकशब्दैरात्मानं चैतन्यरूपं सर्वसंव्यवहारसाधकत्वेन व्यवहा-
ति ज्ञापकं चैतन्यं भावनेन विजानामीत्यादि तत्र विजानामीत्यादिव्यवहारो बाधेकहेतुकस्त्वन्मानादिना प्र-
माणेन विज्ञानतोऽपि प्रसिद्ध्याज्ञानेत्यवस्थानीज्ञानमास्ति व्यवहारोऽपि नास्तीति अन्वयव्यतिरेकज्ञानविवे-
किनाग्रहमवोचं स्विद्धस्यापि श्रुतिविवेकिनामनुभवत एव सिद्धत्वं यथा चेदमाह भगवानीश्वरस्य दृश्यनेत्रमित्या-
दिरूपेणाशिष्टे विज्ञातोऽपि मूढे स्तीत एव स्वप्रकाशत्वेन निःशेषीकरत्वेन मङ्गलाद्याकारेण चैवमेव स्वसंवित्ततः
सिद्धा स्वप्रकाशत्वादिना लिङ्गसिद्धिकोऽन्यादिविवेकेनाविज्ञातापि संवित् व्यवहारसाधकत्वप्राधान्येन विज्ञाता भ-
वति तस्माद्विवेकाविकलानामप्यात्मसंवित्सिद्धिरस्तीति बोध्यं व्यवहारबलेनत्वाभिप्रेत्याह उज्जृम्भत इति उ-
दपिके यथा तथा उज्जृम्भते उल्लसति व्यवहारेषु तत्तया प्रकाशत इत्यर्थः यद्वा उदयिज्जृम्भत इति हेतुः संवित्प्रसि-
द्धो विदत्त्वविद्वत्सु चास्तमिति सर्वदाभानात् विद्वांसोऽहं वयं स्म इति जानन्ति श्रुतिवक्तारोऽपि तथा न किं तमप्रका-
शतेन श्रुतप्रविविदिषद्विद्वद्भेदः जाग्रदित्यादिरभ्युज्जृम्भत इत्यनेनेत्थं जाग्रत्स्वप्नसंदर्भेण प्रमत्तानुग्रसतिमहा-
वाक्यस्य प्रस्तानं प्राह स्याथ उक्तोऽभवति अधुना ब्रह्म प्राह स्याथेमाह ब्रह्मा चैतन्यमेव ग्राह्यं यथा तेन प्रसा

म० दयः पिपीलिकाः कीटविशेषास्तेषां ते पिपीलिकान्ताः ब्रह्मादयश्च ते पिपीलिकान्ताश्चेति ब्रह्मादिपिपीलिको
२ ताः प्राणिनस्तेषां तनवः शरीराणि तासु जगतः प्रपञ्चस्य सादिपीसातादस्मवधानेन रत्तरा कर्त्रीति हेतोः प्रोताश्च
गतत्वया वर्तमानाया प्रसिद्धा संविदात्मता एवं ब्रह्मणो ऽहंस्य परिपूर्णत्वमर्थमुक्तं तेन प्रत्यगात्मन एकत्वमभिवद
ति सैवाहमिति सैव प्रसिद्धैवं संविदहं ग्रहं पदलक्षितं महं प्रत्ययमुक्ता रयंपयापरात्मानं चाहमेव वस्तु दृष्टाव्याप
तदितरस्य जगतस्तद्दृष्टजगतो वस्तुत्वकल्पितं संबन्धेन परमार्थवस्तुनि विद्यमानमुपचर्यते जगतः कल्पितत्वेन
वस्तुतो वस्तुत्वाभावे ऽपि व्यवहारसत्यत्वाङ्गीकारात् एवं वस्तुत्वमस्तीत्यभिप्रायः तदहं न भवामि इदमेव वस्तुनो जडत्वा
त्परिच्छिन्नत्वाच्चेति तदृष्टप्रज्ञा दृढाभेदशय्या संभावनादिभिरनाधिता प्रज्ञा मतिः ज्ञानाद्देहात्मप्रणेत्वयस्य कस्यचिद
पि पुरुषविशेषस्य कृत्या वाचार्यप्रसादमहिम्ना ग्रस्ता विद्यते चेद्यदि स तु पुरुषश्रेष्ठः पञ्चान्तकोऽस्तु भवतु ब्रह्म
वा द्विजो ऽन्त्या विप्रोऽस्तु भवतु गुरुः सर्वज्ञो भगवानिति ज्ञानी त्वात्मैव मे मतमिति स्मृतेः तस्मादात्मनि जेदस्यचे ६१
ये हुति कामस्त्यादिश्लोकेन पञ्चापता दृष्टीमुममनीषा मदीया बुद्धिमेमानुभवः इति यावत् इदमत्राकूतं यस्य तु
शधोरं यस्य ज्ञाय त्व मुच्च सुभिः सुस्फुटं नतायाः संविदं भनतः इति इयता ग्रन्थेनोक्तं प्रज्ञानं ब्रह्मार्थं बुधा एतस्यार्थस
या ब्रह्मादिपिपीलिकान्ततनुषु प्रोतानां जगत्साक्षिणी इति इयता ग्रन्थेनोक्तं ब्रह्मशब्दार्थं विविच्यानयपत द्विज्ञानस्यपू
लभूतसैवाहं न च दृश्यवस्त्विति इयता ग्रन्थेनोक्तं वाक्यार्थानुभवैक्ये नित्यं तत्त्वज्ञो भूत्वा सदा समाहितः सन्नवते मत
तेनु तस्मिन्नमचेतनत्वादिविपरीतज्ञाने किं तु ब्रह्मत्वमतिरेव ब्रह्मस्वेदस्त्वस्मेवनीति श्रुतेरिति यद्यपि सर्वमात्मेति
ष्य विज्ञानात्तु पचत्वाद्धि प्रतीतिर्न पारमार्थिकी तत्त्वाद्यपि व्यवहारसौकर्यान्नायं न येषु खुहारे भद्रन्याय इति न्यायात् भा
वनया सात्मनः सर्वात्मकत्वमनुभवन्ति यथा [illegible] स्वदेहे नम्रवहारं [illegible] विदुषा वर्तितमति
ति चेलोकसंग्रहमेवापि संपश्यन्कर्तुमर्हसीति स्मृते [illegible] भिप्रायात् वेविज्ञायते न तु चेज्जलोस्तु सत्त द्विजो २
स्तु गुरुरित्येषा मम मनीषेति कथमसि [illegible] चिनमिति चेन्न [illegible] शत्तवेषधारिणां [illegible]

स्यापि विप्रोऽयं श्वपचोऽयमित्यपि महान्कोऽयं विभेदभ्रमस्त्येवैकरूपत्वात् उक्तस्य चोक्तानुसारित्वात् अथ च
परमार्थवस्तुन उपनिषदेकसमधिगम्यत्वेन वेदाधिकारिणामेव तदनुभवस्तथापि यस्य कस्यचन योगभ्र
ष्टो गरुनाकर्मणा गतिरिति वचनात् किंचित्कर्मशेषतया चण्डालदेहधार्यपि भवेत्तामनतस्मिन् जन्मनि न
तस्याध्ययनापेक्षा जन्ममात्रेणैव प्रारब्धकर्मणो नष्टत्वात् भूतसर्वगत्या ब्रह्मानुभवस्य सिद्धत्वात् न त
स्मिन्नमचाण्डालत्वादिभ्रमः न हि ज्ञानेन सदृशं पवित्रमिह विद्यत इति स्मृतेः अत्र पिताऽपिता माताऽ
माता लोका अलोकाः देवा अदेवा वेदा अवेदा अत्र स्तेनोऽस्तेनो भवति भ्रूणहाऽभ्रूणहा इत्यादिश्रुतेश्च ३ ॥
इदानीं यजुर्वेदोपनिषद्गतं अहं ब्रह्मास्मीति महावाक्यार्थमभिवर्णयति ब्रह्मैवाहमिति यस्य मतिः सु
खतरे नित्ये परे निर्मले दृढा स तु पुरुषश्चण्डालोऽस्तु द्विजो वाऽस्तु गुरुरित्येषा मनीषेत्यन्वयः इत्यादि विशेष

ब्रह्मैवाहमिदं जगच्च सकलं चिन्मात्रविस्तारितं सर्वं चैतदविद्यया त्रिगुणयाऽशेषं मया कल्पितं
इत्थं यस्य दृढा मतिः सुखतरे नित्ये परे निर्मले चण्डालोऽस्तु स तु द्विजोऽस्तु गुरुरित्येषा मनीषा मम ४

णविशेषिते परे किमिति दृढतराकांक्षायामाह ब्रह्मैवाहमित्यादि अहमहंशब्दप्रत्ययाभ्यामुपलक्षि
त आत्मा ब्रह्मैव परिपूर्णः परमात्मैव किंचेदं सकलं समस्तं जगच्चेतनाचेतनात्मकं चिन्मात्रविस्तारितं चि
न्मात्रे चिदेकरसे ब्रह्मणि विस्तारितं प्रपंचितं केन विस्तारितमित्याशंकायामाह सर्वं चैतदिति एतत्परिदृ
श्यमानमशेषं ब्रह्मादीश्वरपर्यन्तं सर्वं जगत् त्रिगुणया त्रिगुणात्मिकयाऽविद्यया मायया मया अध्यस्तेन क
ल्पितं रचितं इत्थमेवं प्रकारेण निश्चितेति शेषः दृढा प्रत्यूहदृढबुद्धिरसंभावनादिभिरबाधितेत्यर्थः यस्य
वा कस्यचित् पुरुषवरस्यास्ति विद्यते चेत् इत्यनेन ज्ञाननिष्ठाया दुर्लभत्वमुक्तं स तु चण्डालोऽस्त्वित्यादि स्पष्टम्
४ ॥ अथ पुनः सामवेदोपनिषद्गतं तत्त्वमसीति महावाक्यस्यार्थमाह दास्यादिति सर्वस्य जगतः कारण
सत्तामात्रं वस्तु यन्निर्दिष्टं सदेव सोम्येदमग्र आसीदित्यादिना तदेव त्वं न ततोऽभिन्नोऽसि भेदस्य मिथ्यात्वात्

म. ४ वस्तुन एकरूपत्वादित्युपदेष्टुराचार्यस्य वचसा ब्रह्म परिपूर्णं वस्तु निरन्तरं स्वात्मनोऽभिन्नं निश्चित्य निश्चयेन ज्ञात्वाखिलं समस्तं जगत् आश्रयत्वं वेदान्तस्थं एवमेव नन्तु नित्यमिति नित्यं सर्वदा विमृशता स्वालोचयता स्वत एव तिष्ठाजनशान्तात्मना निर्बीजो निष्कम्पः शान्तः उपरतः स्वात्मान्तःकरणं यस्य तेन भूतमतीतेभाष्यामा मिचकारेण वर्तमानेन च यद्दुष्कृतं दुःखानुभवकारणं पापं संविन्मये अहं ब्रह्मास्मीति ज्ञानस्वरूपपावके भस्मी प्रदहता प्रकर्षेण दहनेन कृतवता येन गुरुकृपया धारयेण ब्रह्मविन्मूर्ध्नेति यावत् स्वस्वकीयवपुः शरीरं प्रारभ्य यस्य वपुषो भावि फलाय कर्मणा समर्पितं प्रारब्धाधीनं कलेवरं कृतं तत्स्वजीवितं मरणं वा न स्वयं वा द्विविधि यते इति भावः स तु च शैलो लोहितं जीवाभ्रात्मकः हरिरित्येतत्तु इतु गीतया ४ समनन्त्यममात्मा ब्रह्मैव तत्त्वमस्य यवेण प्राप्तो पनिषद्गत महावाक्यस्यार्थमाह यातिर्यगिति तत्र तावदयमात्मा ब्रह्मेति वाक्यस्य ब्रह्मशब्दा

शश्वन्नश्वरमेव विश्वमखिलं निश्चित्य वाचा गुरोर्नित्यं ब्रह्म निरन्तरं विमृशता निर्व्याजशान्तात्मना भूतं भावि च दुष्कृतं प्रदहता संविन्मये पावके प्रारब्धाय समर्पितं स्ववपुरित्येषा मनीषा मम ४ यातिर्यङ्नरदेवताभिरहमित्यन्तः स्फुटा गृह्यते यद्भासा हृदयाक्षदेहविषया भाति स्वतोऽचेतनाः तां भास्यैः पिहितार्कमण्डलनिभां स्फूर्तिं सदा भावयन्योगी निर्वृतमानसो हि गुरुरित्येषा मनीषा मम ५

र्थमाह यातिर्यगिति या प्रसिद्धा स्फूर्तिः स्फुरणं चैतन्यमिति यावत् तिर्यङ्नरदेवताभिः तिर्यक्पशुभिर्नरैर्मनुष्यैर्देवताभिर्देवतैश्च अहमित्यहंप्रत्ययव्यवहारयोग्यतया अन्तर्विज्ञानमयकोशं वा आश्रयं ... स्फुटमनावरणं यथा भवति तथा गृह्यते अनुभवते किं च यद्भासा यस्याः स्फूर्तेः भासा प्रकाशेन हृदयाक्षदेहविषयाः हृदयं हृदि दहो लके अपतनुमस्येति हृदयं मनः अक्षाणीन्द्रियाणि ज्ञानकर्माख्यानि देहः स्थूलः विषयाः शब्दाद्याः चेतना द्यास्ते सर्वे स्वतः स्वभावतः अचेतना जडा अपीत्यपि शब्दो द्रष्टव्यः भान्ति प्रकाशन्ते चेतना इवेत्यर्थः तां भा स्यैः प्रकाश्यैः हृदयाक्षदेहविषयैः पिहितार्कमण्डलनिभां पिहितमाच्छादितं मेघैर्यदर्कमण्डलं सूर्यमण्डलं तन्निभाम्

त्सटघीस्फूर्तिर्व्याख्यातो सद्गावित्र्योगी निर्जितेंद्रियो भावयत्त्वरमिति ध्यायन्निति आत्मा शांतोशेषो व्याख्या
तः यास्फूर्तिस्तिर्यक्तदेवताभिरहमित्यं नः स्फुटेपू सत्त्वर्निबद्धणोरूपमुक्तं यद्वासाद्भदयात्तदेहविष
याभोनिरिवतोचेतनात्यात्मनोरूपमुक्तं ताभासैः पिहितार्कमंडलनिभा स्फूर्तिं सत्त्वाभावयन्निति दि
त्यात्मनोरेकत्वमुक्तं यच्छहहृये नस्फूर्तिसमष्टिव्यष्ट्युपाधिविशिष्टालत्वाधिवात छहेनेकात्वये नतस्य
योजितत्वात् एवं निर्दिष्टेतमानसोमोत्तमश्रवणयुक्तमानसोहि प्रसिद्धो यः गुरुरित्याविस्पष्टमेव यथावाहि मा
स॰ होहत्वर्थो यस्मान्निर्दिष्टमानसस्ताड्गर्हार्यति ४ एवं महावाक्यचतुष्टयस्य जीवब्रह्मैकापरत्वमभिव्यपि
ते निर्दिष्टस्य गुरुत्वमपि व्याख्यायाधुना फलितमाह यत्सौख्याम्बुधीति यत्स्मिन्निर्विद्वन्स्तत्सौख्यमेव
मंबुधिसमुद्र इव समुद्रः अपर्यंतत्वात् एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवंतीति श्रुतेः तस्य

65 यत्सौख्याम्बुधिलेशलेशत इमे शक्रादयो निर्वृता यच्चित्ते नितरां प्रशान्तकलने लब्ध्वा मुनिर्निर्वृ
तः यस्मिन्नित्यसुखाम्बुधौ गलितधीर्ब्रह्मैव न ब्रह्मवित् यः कश्चित्स सुरेन्द्रवन्दितपदो नूनं मनीषा
मम ५ ॥ इति श्रीमच्छंकराचार्यविरचितं मनीषापंचकं संपूर्णम् शुभं ॥

सौख्याम्बुधेर्लेशलेशतः स्वल्पात्स्वल्पतरालेशमात्रादित्यर्थः इमे प्रसिद्धाः शक्रादयः इंद्रादयो ब्रह्मरुद्र
पर्यंताः प्रभृतयः आदिशब्देनोच्यंते निर्वृता सुखास्सानंदितास्संजाता इत्यर्थः यच्च चित्ते ततः करणेनित
रामत्यंतप्रशांतकलने चलनयस्मिन्सनिलस्थाप्राप्य अपरोक्षतयाहमित्यनुभूयेत्यर्थः सम्मुनि
र्मननशीलो निर्वृतो मुक्तो भवतीत्यर्थः यस्मिन्योगिगम्यत्वगम्ये प्रसिद्धे नित्यसुखांबुधौ सुखमेवांबु
धिः सुखांबुधिर्नित्यश्चासौ सुखांबुधिश्चेति नित्यसुखांबुधिः सुखस्य विषयजनितस्येहत्वधीनतयाते

म॰ ५

णिकत्वेष्वविषयजनितस्य हृत्यधीनत्वाभावान्नित्यत्वमत एवापरिच्छिन्नत्वं चेति विज्ञेयं तत्र तस्मिन्नि
त्यसुखेऽम्बुधौ गलिताऽहंबुद्धिविलीनेत्यर्थः धीस्तु विश्वस्याकारं हृत्वेति कृतिर्यावत् यस्य स तथा स ब्रह्मैव
ब्रह्मस्वरूप एव न ब्रह्मविद्ध्यस्व वेत्तीति ब्रह्मवित्सु न भवति हृत्ते त्वपरहितत्वात् हृत्याधीने हि वेद्यत्वे
वेदितृत्वे च यस्य तादृशः कश्चिदित्यनेन ब्रह्मवित् निर्विकल्पसमाधिः स लोके दुर्लभतर इति ग
म्यते स एव सिद्धो ब्रह्मविद् रिष्टः सोऽद्वंद्वितपदः सुराः देवतास्तेषामिन्द्रः स्वामी स्थानमवस्तेनवे
दितेन मस्तकेन पदं पादो यस्य स तथा नूनं सत्यं अस्मिन्नर्थे न संशयः एवं मम मनीषेति स्पष्ट
मनीषापंचकस्येव वक्तृता टीका मनोहरा बालगोपालेन्द्रनाम्ना मुनिना मधुमंजरी ७ इति
श्रीमनीषापंचकव्याख्या संपूर्णम् शुभं ॥ सं॰ १९ २ श्राश्च॰ ६ पा॰ शुभं ॥ ॥

९१

मनीषापञ्चक

५

ॐ श्रीगणेशाय नमः ॐ श्रीगुरवे सरस्वतीरूपाय नमः ॐ नमः शिवायेति मम सर्वस्व जपः ॥ १
हे भगवन् ते तव महिम्नः परं पारं उत्कृष्टं पारमेव मानं पर्यन्तं अविदुषोः विज्ञानतोः ज्ञानिनः
पुंसः पुरुषस्य यदि स्तुतिः असदृशी स्यात् अनुरूपा अयोग्या भवेत् तत्तदा ब्रह्मादीनामपि
गिरः स्तुतिविषये अवसन्नाः निःफला भवेयुः निःफलाः भवन्ति तत्तस्मात्कारणात् केवलमस्माकमेव स्तुतेरनधिकारत्वेन ब्रह्मादिरपि तथैव स्यादित्याह अतेन सर्वोऽपि
ॐ महिम्नः पारं ते परमविदुषो यद्यसदृशी स्तुतिर्ब्रह्मादीनामपि तदवसन्ना
स्तास्त्वयि गिरः अथावाच्यः सर्वः स्वमतिपरिणामावधि गृणन् ममाप्येष स्तोत्रे
हर निरपवादः परिकरः १ ॥ स्तुतेरनधिकारित्वं प्रतिपादितं अपवादेन अधिकारित्वं प्रतिपादयन्नाह हे भगवन् तथैव अपेक्षणे मम स्तोतापि जनः स्वमतिपरिणामावधि स्वकीयामतिस्तस्याः परिणामः परिपाकः स एवावधिः सीमा मर्यादा यत्र तत्र स्व
मतिपरिणामावधिः यथा भवति यद्येवं तर्हि हे हर दीनार्तिहर अस्मिन् स्तोत्रे ममाप्येष परिकरः प्रारम्भो निरपवादो निर्दोषो भवेत् १ शिवायोनमः ॥॥॥

वामेवं ऽत्रालं स्तुवन्नवाच्य अनुपालम्भनीयो ऽनुग्राह्यो भवति ॥ २

ग्रं ३२

विनेयवृद्धिसौकार्यमुद्दिश्य ग्रंथकृत्स्वयं श्लोकसंख्योपरस्कृत्य प्राहानुक्रमणीस्फुटं । दशाष्टकेषु
श्लोका गुरुणोपदेशोऽस्तु सन्ति प्रथमे प्रकरणे पंचविंशतिश्लोकाः शिष्योक्तानुभवोल्लासे द्विती
यप्रकरणेऽस्तु चतुर्दश श्लोकाः पुनर्गुरुणोदितेऽपमृत्युपदेशाख्ये तृतीयप्रकरणेऽस्तु । षट् श्लो
काः शिष्योक्तानुभवोल्लासे चतुर्थप्रकरणेऽस्तु चत्वारः श्लोका गुरुप्रोक्ते लयाख्ये पंचमे प्रकरणे
ऽस्तु पुनश्चत्वारः श्लोका गुरुप्रोक्ते प्रतिवादिसिद्धलयनिषेधोपदेशाख्ये प्रकरणेऽस्तु श्लोकाना

दशाष्टकेऽपि देशोऽस्तु श्लोकास्तु पंचविंशतिः समात्मानुभवोल्लासे उपदेशा चतुर्दश । १
षड्ल्लासप्राये चैवमुपदेशे चतुस्तथा पंचके स्यादनुभवे वंधमोक्षचतुष्टकं ॥ २
निर्वेदोपशमो ज्ञानमेवमेवाष्टकं भवेत् यथाहृत्वसमकं च शान्तो साहुर्दशमिते ३
तत्रोपदेशो विंशाख्यदशज्ञानोपदेशके तत्त्वस्वरूपे विंशमाश्रमे च शतकं भवेत् ४

पंचके शिष्यप्रोक्ते अनुभवाख्ये सप्तमे प्रकरणे स्यात् श्लोकानां [illegible] गुरुप्रोक्ते वंधमोक्षेऽष्टमे प्रकर
णे स्यात् २ निर्वेदोपशम इति श्लोकाष्टके गुरुप्रोक्ते निर्वेदाख्ये नवमे प्रकरणे स्यात् गुरुप्रोक्ते उ
पशमाष्टकं नाम दशमे प्रकरणे गुरुप्रोक्ते ज्ञानाष्टकं नामैकादशे प्रकरणे शिष्यप्रोक्तमेवमेवा
ष्टकं नाम द्वादशे प्रकरणे शिष्यप्रोक्ते यथासुखसप्तकं नाम त्रयोदशे प्रकरणे शिष्यप्रोक्ते शान्तिच
तुष्कं नाम चतुर्दशे प्रकरणे ३ तत्रोपदेश इति विंशतिश्लोका गुरुप्रोक्ते तत्त्वोपदेशाख्ये पंचदशे

कविक्षेप इति सर्वदा निष्क्रियस्य मे विक्षेपादिकाक्रिया केत्यर्थः ॥ ९ ॥ क्वैष इति सदा निर्विमर्षस्य विशेष
ज्ञान वृत्तिशून्यस्य मम व्यवहा[illegible]व्यवहारिकपदार्थज्ञानं क्व परमार्थज्ञानं च क्व सुखं दुःखं वेत्यर्थः ॥ ९ ॥
क्व मायेति सर्वदा विमलस्य पापादिमलशून्यस्य मम माया संसारः प्रीति विरतिश्च वेत्यर्थः जीवभावो वा
स्वभावस्त्र कार्योपाध्यभावे जीवत्वस्य वक्तुमशक्यत्वादित्यर्थः ॥ क्व प्रवृत्तिरिति कूटस्थस्य निष्क्रियस्य
अनिर्विभागस्य भेदरहितस्य सर्वदा स्वस्थस्य मम प्रवृत्तिः नि[illegible]फलं वेत्यर्थः ॥ १२ ॥ क्वोप
क्व विक्षेपः क्व चैकाग्र्यं क्व निरोधः क्व मूढता क्व [illegible]का[illegible]वा सर्वदा निष्क्रियस्य मे ॥ ९ ॥
क्व चैष व्यवहारो वा क्व च सा परमार्थता क्व [illegible]वा सदा निर्विमर्शस्य मे सदा ॥ ९ ॥
क्व चैष व्यवहारो वा क्व च सा परमार्थता क्व जीवः क्व च तद्ब्रह्म सर्वदा विमलस्य मे ॥
क्व माया क्व च संसारः क्व प्रीतिर्विरतिः क्व वा क्व जीवः क्व च तद्ब्रह्म सर्वदा विमलस्य मे ॥
क्व प्रवृत्ति[illegible]र्निवृत्तिर्वा क्व मुक्तिः क्व च बन्धनं कूटस्थनिर्विभागस्य स्वस्थस्य मम सर्वदा ॥ १२ ॥
क्वोपदेशः क्व वा शास्त्रं क्व शिष्यः क्व च वा गुरुः क्व चास्ति पुरुषार्थो वा निरुपाधेः शिवस्य मे ॥
क्व चास्ति क्व च वा नास्ति क्वास्ति चैकं क्व च द्वयं बहुनात्र किमुक्तेन किञ्चिन्नोत्तिष्ठते मम ॥ १४ ॥
देश इति निरुपाधिरुपाधिशून्यस्य शिवस्य निर्मानन्दस्वरूपस्य उपदेशक्रिया क्व उपदेशाः केशा
स्त्रं क्व माया उपाध्यभावे तत्कृतोपदेशास्य चाभावात् शिष्यो वा गुरुर्वा क्व स्वयं शिवस्वरूपस्य च
पुरुषार्थो वा क्व चास्ति ॥ १३ ॥ जीवन्मुक्तदशामुपसंहरति क्व चास्तीति मम नास्तीति न स्फुरति अस्ति वा
पेक्षतया नास्तीति न स्फुरति अस्ति वापेक्षतया नास्ति वस्त्वन्तरमेवमित्थं सापेक्षत्वा चैकं व
द्वित्वं वापि मम न स्तः प्रमेयं बाह्यभेदेन निषेधस्य कल्पकोटिभिरपि वक्तुमशक्यत्वात् सामान्यतया

अ. ७८

अष्टके चेति शिष्यप्रोक्तमात्मविश्रान्त्यष्टकं नामैकोनविंशतिप्रकरणं शिष्यप्रोक्तं जीवन्मुक्ति-
चतुर्दशकं नाम विंशतितमं प्रकरणं गुरुप्रोक्तं संख्याक्रमकथनं नामैकविंशतितमं प्रकरणं
अतः परं विंशत्येकमितैः खण्डैः ग्रन्थैकात्म्यं ग्रन्थखण्डानां चैवैकात्म्यं समूहरूपतया एकात्मत्वमि-
त्यर्थः ५ विंशत्येकेति इत्यष्टावक्रसंख्याक्रमं विंशत्येकमितैः खण्डैः एकविंशतिखण्डैरित्यर्थः

अष्टके चात्मविश्रान्तौ जीवन्मुक्तौ चतुर्दश
षट् संख्याक्रमविज्ञाने ग्रन्थैकात्म्यमतः परं
विंशत्येकमितैः खण्डैः श्लोकै रामाग्निमध्यकैः
अवधूतानुभूतेश्च श्लोकाः संख्याक्रमा अमी

श्लोकै रामाग्निमध्यकैः जीवात्मपरमात्मभेदेन भिन्न आत्मा द्वौ अग्नित्रयः मध्यकं च मध्यशून्यं त्रे-
कानां वामतो गतित्वात् एते द्वौ मध्ये शून्यं आदौ त्रयं द्व्यधिकैः त्रिशतश्लोकैरित्यर्थः श्लोकसंख्या-
मुपसंहरति अवधूतानुभूतिरूपोयं ग्रन्थः तस्य संख्याक्रमो विद्यते येषु ते संख्याक्रमा ईदृशाः
श्लोका अमी कथिता इत्यर्थः ८ इति श्रीमत्सिद्धेश्वरविरचितायां अष्टावक्रटीकायां संख्याक-
मादिव्याख्यानाम प्रकरणमेकविंशं इति समाप्तं शुभं ११.३ ॥ ७८

ॐ गुरुर्गुरुर्वैर्यतिवारिवारिदः श्रीवेदिनो जातु न सेवितं मुखं स किं न दाता स च किं न पावको बलीय
सी केवलमीश्वरेच्छा १ विभीषणो रावणमब्रवीद्धवस्त्वं रामचंद्राय ददस्व सीतां स किं भ्राता स च १
न किं भ्राता बलीयसी केवलमीश्वरेच्छा २ अनादरेण परमेश्वरस्य यस्य नाशो किल प्रापदन्तः १
सा किं न भार्या स च किं न भर्ता बलीयसी केवलमीश्वरेच्छा ३ गुरु विधिं भवति सैंहिकेयः स न
स चेद्रो जठरेन जीर्णः स किं न भक्तः स च किं न भोक्ता बलीयसी केवलमीश्वरेच्छा ४ वरन्व
नांते नवमंजरीषु न षट्पदो गंधफलीमजिघ्रत् सा किं न रंभा स च किं न रंता बलीयसी केव
लमीश्वरेच्छा ५ वक्त्रो विशुद्धामपि जानकीं तां स रामचंद्रो विजहौ वनांते सा किं न पूता स
च किं न नेता बलीयसी केवलमीश्वरेच्छा ६ जानामि रामेण पुमान्हृदने च जानामि सीता ज
नकप्रसूती जानामि कालविपरीतबुद्धी बलीयसी केवलमीश्वरेच्छा ७ रामसीताभ्यां नमः

आ॰ सर्वेषामाक्षेपाणां समर्थनार्थं ज्ञानिनो निरूपयन्नाह निःस्पृहमिति यस्य नैराश्ये मोक्षेपि मानसं निःस्पृ
१९ हं तस्य आत्मज्ञानतृप्तस्य ब्रह्माहमस्मीति ज्ञानवतः समाप्तसर्वमनोरथस्य केन समं तुलना जायते न केना
नापीत्यर्थः १२ ज्ञानिनो हानोपादानादिव्यवहारमाक्षिपति स्वभावादिति प्रपंचो मिथ्या दृश्यत्वात् मु
क्तिकारज्ञानतः स्वमनुमानादेतद्दृश्यं न किंचन सत् नाप्यसदिति जानानो निश्चिन्वन्यो धीरधीः स इदं

निःस्पृहं मानसं यस्य नैराश्येपि महात्मनः तस्यात्मज्ञानतृप्तस्य तुलना केन जायते १२ नकेनापितस्मानना
स्वभावादेव जानानो दृश्यमेतन्न किंचन इदं ग्राह्यमिदं त्याज्यं स किं पश्यति धीरधीः १३
अन्तस्त्यक्तकषायस्य निर्द्वन्द्वस्य निराशिषः यदृच्छयागतो भोगो न दुःखाय न तुष्टये १४
इत्याक्षेपद्वारोपदेशचतुर्दशकं तृतीयं ३ ॥

ग्राह्यमिदं त्याज्यमि तिकथं प्रपश्यतीत्याक्षेपः १३ अन्त
हेतुमाह अन्तस्त्यक्तेति अन्तःकरणेन त्यक्ताः कषाया विषयवासना येन तस्य निर्द्वन्द्वस्य शीतोष्णा
वि॰ दिसमचित्तस्य अत एव निराशिषो विषयवासनाहीनस्य यदृच्छया दैवयोगात् आगतः प्राप्तो भोगो भु
ज्यमानो विषयो दुःखाय न भवति तुष्टये च न भवति १४ इति श्रीमत् विश्वेश्वरविरचितायामष्टावक्र
टीकायामाक्षेपद्वारोपदेशचतुर्दशकं नाम तृतीयं प्रकरणं ३ ॥ ॥ ॥ १२

इहेति ऐहिकामुष्मिकभोगविरक्तस्य नित्यमात्मतत्वमनित्यं शरीरादिकं तद्विवेकिनो मोक्षः स च चिदा-
नंदस्तत्कामस्यांतःकरणस्य एवंविधस्यापि ज्ञानिनोऽपि मोक्षादेव भ्रमहेतुः पतनधनवियोगादेव विभीषि-
काभयं दृश्यते नहि स्वमहत्वे तं पुनर्विनाशापि जायते भयं क्वापि दृष्टमिति भावः ८ एवमात्मप
मुक्त्यापूर्वमुक्तं यथत्वानि नस्त्रोषरोषावञ्चाविनाविनिकं ठनौ निरूपयति धीरस्त्विति धीरो ज्ञानी लो-
कैर्विषयान् भोज्यमानोऽपि तथा निंदादिना पीड्यमानोऽपि सर्वदात्मानं केवलमखंडः स्वादिर-
हितं पश्यन् न तुष्यति न च कुप्यति तोषरोषहेतूनां केवलात्मनिश्चयस्य भवनान्नादेः संस्थः ९ किंच तोष-

इहामुत्र विरक्तस्य नित्यानित्यविवेकिनः आश्चर्यं मोक्षकामस्य मोक्षादेव विभीषिका ८
धीरस्तु भोज्यमानोऽपि पीड्यमानोऽपि सर्वदा आत्मानं केवलं पश्यन्न तुष्यति न कुप्यति ९॥
चेष्टमानं शरीरं स्वं पश्यत्यन्यशरीरवत् संस्तवे चापि निन्दायां कथं क्षुभ्येन्महाशयः १०
मायामात्रमिदं विश्वं पश्यन् विगतकौतुकः अपि सन्निहिते मृत्यौ कथं त्रस्यति धीरधीः ११

वीतकः १४

रोषहेतूनां स्तुतिनिंदादीनां शरीरधर्मत्वात् कुतोऽस्य वात्मभिन्नत्वेनानुसंधानात् कथं ज्ञानिनस्तोषरोषा-
विस्याह चेष्टमानमिति स्वशरीरं स्वात्मभिन्नं चेष्टाश्रयत्वात् अन्यशरीरवत् इति यः पश्यति स महाशयः
संस्तवे स्तुतावपि च निंदायामपि कथं क्षुभ्येत् कथं तोषरोषरूपां विक्रियां व्रजेन्नेत्याक्षेपः १० मार्य-
मारकयोरसमत्वानुसंधानात् सन्निहितेऽपि मृत्यौ ज्ञानिनस्त्रासः कथमित्याह मायामात्रमिति इदं दृ-
श्यमानं विश्वं मार्यमारकादिरूपं समग्रं मायामात्रमसत्यरूपं पश्यन् तत एव कुतः इदं शरीरादिकं जाय-
ते कुत्र च विलयं यातीत्येवं रूपकौतुकरहितं तया धीरः स्वस्वरूपादचलाधीर्यस्य सः सन्निहिते मृत्यौ स

अ॰ ९ तदेवं श्लोकत्रयेण ज्ञानिनि शिष्ये दृश्यमानं विषयव्यवहारमाक्षिप्येदानीं सर्वज्ञानिषु विषयव्यवहारं शिष्यपरीक्षार्थं
गुरुराक्षिपति ज्ञात्वापीति शुद्धचैतन्यं ज्ञात्वापि गुरुमुखाद्वेदान्तवाक्यतः साक्षात्कृत्वापि उपस्थे समीपस्थे वि-
षये अत्यन्तसक्तः सन्नात्मनः कथं मालिन्यमबोधभावमधिगच्छति प्राप्नोतीति अत्र प्रकरणे शिष्यजिज्ञासा- ज्ञातुमिच्छा २
र्थमाक्षेपमुद्रयैव प्रवृत्तत्वात् यत्राक्षेपवाचकपदं न दृश्यते तत्र तदूह्यं ४ पुनराश्चर्यमुद्भावयति
सर्वभूतेष्विति सर्वभूतेषु ब्रह्मादिस्थावरान्तेषु आत्मानमधिष्ठानभूतं जानतः सर्वभूतानि चात्मनि रज्जौ भुजंग-
वदध्यस्तानि जानतो मुनेर्विषयेषु ममत्वमनुवर्तत इति आश्चर्यं असंभावनं हि शुक्तिकायामध्यस्तं रजतमिति

ज्ञात्वापि शुद्धचैतन्यमात्मानमतिसुन्दरम् उपस्थेऽत्यन्तसंसक्तो मालिन्यमधिगच्छति ४ ॥
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि मुनेर्जानत आश्चर्यं ममत्वमनुवर्तते ५ ॥
आस्थितः परमाद्वैतं मोक्षार्थेऽपि व्यवस्थितः आश्चर्यं कामवशगो विकलः केलिशिक्षया ६ ॥
उद्भूतं ज्ञानदुर्मित्रमवधार्यातिदुर्बलः आश्चर्यं काममाकाङ्क्षेत् कालमन्तमनुश्रितः ७ ॥

जानतः तत्र ममत्वं संभवतीति भावः ५ आस्थित इति परमं सजातीयविजातीयस्वगतभेदशून्यमद्वैतमा-
स्थितः साक्षादनुभवन् तथा मोक्षस्वरूपार्थः सच्चिदानन्दात्मा तत्र व्यवस्थितः तदेकशरणोऽपि कामवश- वीतरः
गः सन् केलिशिक्षया नानाक्रीडाभ्यासेन विकलो दृश्यत इत्याश्चर्यं ६ उद्भूतमिति उद्भूतं कामं ज्ञानदु-
र्मित्रं ज्ञानस्यात्यन्तवैरिणं अवधार्य निश्चित्यापि अतिदुर्बलः अतिशयेन ज्ञानेन बलशून्यः वृत्तानी कामवि-
षयमाकाङ्क्षेत् कामं वाञ्छतीदं आश्चर्यं कीदृशः अन्तकालमनुसमीपे श्रितः नद्धि समीपवर्तिन्यन्त- ९
काले सति विवेकिनो विषयतृष्णायुक्ते त्यभिप्रायः ७ ॥

प्रकृतीभूति हैरंजर्वे अंव निश्चित्या पि

योग्यो न भवति

शिष्यानुभवपीयूषे ज्ञातेपि करुणावशात् तद्विज्ञानपरीक्षार्थं शिष्यमाह गुरुः पुनः १ विज्ञानानुभवमपि स्व
शिष्यं व्यवहारस्थितं दृष्ट्वा तद्विज्ञानपरीक्षार्थं तद्व्यवहारस्थितिमाह शिष्यात्मानुभवशालिनीं स्थितिमुपदिश
ति अविनाशिनमिति हे शिष्य अविनाशिनं त्रैकालिकसत्ताशालिनं कालेनाप्यवच्छेदशून्यमात्मानं देशतो
मवच्छेदशून्यमेकं वस्तुतोप्यवच्छेदशून्यं चित्स्वरूपं विज्ञाय निदिध्यास्य तत्त्वतः आत्मज्ञस्य अत एव धीरस्य
नवार्थार्जने व्यावहारिकार्थसंग्रहे कथं रतिः प्रीतिर्लक्ष्यते इत्याक्षेपः १ ननु ज्ञाने सति विषयसंग्रहः कथ
मनुपपन्नमित्याशंक्य विषयप्रीतेरात्माज्ञानमूलत्वं सदृष्टान्तं सोपपत्तिकमाह आत्माज्ञानादिति अहो इति १

तवात्मज्ञस्य धीरस्य कथमर्थार्जने रतिः १ ॥
अष्टावक्रः अविनाशिनमात्मानमेकं विज्ञाय तत्त्वतः शुक्तेरज्ञानतो लोभो यथा रजतविभ्रमे २ ॥
आत्माज्ञानादहो प्रीतिर्विषयभ्रमगोचरे सोहमस्मीति विज्ञाय किं दीन इव धावसि ३ ॥
विश्वं स्फुरति यत्रेदं तरंगा इव सागरे

हे शिष्य विषयभ्रमगोचरे विषये या प्रीतिः सा आत्माज्ञानादेव भवति नत्वात्मज्ञानात् व्यतिरिक्तविषया
संबोधने हे शिष्य ... यथा रजतविभ्रमे सति शुक्तेरज्ञानतो लोभः
एणंबाधादिति भावः अत्र लोकप्रसिद्धं दृष्टान्तमाह शुक्तेरिति ... विषयस्यापि इत्थंनिपातो विशेषणं विशे
पामराणामप्युद्भवसात्विक इत्यर्थः विषयभ्रमगोचर इत्यत्र ... विषयभ्रमगोचर इत्यनेन प्रीति
षणं वक्तुमिति अत्र वक्तुलग्रहणात् आगन्तुत्ववत् आत्माज्ञानं न इतिपदं ... आत्मनि ज्ञाते सति वि
रपि संबध्यते २ अज्ञानमूला विषयप्रीतिरिति प्रागुक्तं अथ सर्वाभ्यस्ताधिष्ठानतया
षये पुनः पुनः प्रीतिसंभव इत्याह विश्वं स्फुरतीति सागरे तरंगा इव यथा पृथक् सत्तारहिताः लक्षत यत्रे

अ॰ ९

अथ स्वस्य सर्वाधिष्ठानत्वं प्रपञ्चयन्नाह अहो इति अहो इत्याश्चर्ये अनंतमहांबोधौ मयि चित्तवाते समुद्यते समुत्पन्ने सति विचित्रैः नानाविधैः भुवनरूपैः कल्लोलैस्तरंगैः द्राक् अनर्थं समुदितं उदयो लब्धस्तथा वारिधेस्तरगा इव मत्तो भुवनानि वस्तुतो नान्यानीत्यर्थः २३ प्रारब्धक्षयदशामनुवदति मयीति अनंतमहांभोधौ सर्वव्यापके चित्समुद्रे मयि चित्तवाते संकल्पविकल्परूपपवनः शान्ते इति मनमारुते प्रशाम्यति सति संकल्पादिरहिते जीववणिजो जीवात्मलक्षणस्य वाणिज्यकर्तुः अभाग्यात् प्रारब्धक्षयात् जगत्पोतः शरीरादिनौकादिसमूहो विनाशशीलः विनाशवान् भवतीत्यर्थः २४ अथ बाधितानुवृत्त्या स्वस्मिन् सर्वजीवस्य

अहो भुवनकल्लोलैर्विचित्रैर्द्राक् समुत्थितं मय्यनंतमहाम्भोधौ चित्तवाते समुद्यते २३ ॥

मय्यनंतमहाम्भोधौ चित्तवाते प्रशाम्यति अभाग्याज्जीववणिजो जगत्पोतो विनश्वरः २४

मय्यनंतमहाम्भोधावाश्चर्यं जीववीचयः उद्यन्ति घ्नन्ति खेलन्ति प्रविशन्ति स्वभावतः २५ ॥

वहारं प्रपञ्चयन्नाह मयीति आश्चर्यं निष्क्रिये निर्विकारे मयि अनंतमहांभोधौ जीवाख्यवीचयस्तरंगा उद्यन्ति अभिव्यक्ता भवन्ति च मिथः परस्परं घ्नन्ति नाशयन्ति द्वेषशत्रुभावाध्यासात् अन्ये च मिथः खेलन्ति मित्रभावाध्यासात् अविद्याकामकर्मक्षये सति च मयि विशन्ति चकारात् स्वभावतः अविद्याकामकर्मस्वभाववशात् ॥ तस्मात् किं प्राप्नुवन्ति स्वभावतः स्वस्वरूपस्य अशरीररूपेण भावनस्तत्रैव प्रविशन्ति घटाकाशादयश्च महाकाशे इति विवेकः २५ द्वितीयेऽस्मिन् प्रकरणे शिष्येणानुभवस्थितिः निवेदिता गुरोस्तुष्ट्यै वक्ष्यर्थगुरुः स्मृता १ इति श्रीमद्विश्वेश्वरविरचितायामष्टावक्रटीकायां शिष्येणात्मानुभवोल्लासः पंच

अनुवदता

९

ननु सर्वस्य प्रपंचस्यावास्तवत्वे वर्णजात्याश्रयं शरीरमप्यवास्तवमेवेति शरीरविशेषमधिकृत्य प्रवर्तमाने विधि
निषेधमप्यवास्तवं स्यात्तथा च तद्बोधितस्वर्गनरकयोरप्यवास्तवत्वात्स्वर्गादावनुरागो नरकादिभ्यश्च भयं न
स्यात् किंच शास्त्रबोध्यावंधमोक्षावपि वास्तवौ न स्यातामित्याशंकां श्लोकद्वयेन परिहरति शरीरमिति श
रीरादिकमेतत्कल्पनामात्रमेव चिदात्मनः सच्चिदानंदरूपस्य मम एतैः शरीरादिभिः न किमपि कार्यं
साध्यं विधिनिषेधादिकं तत्तु अविद्यावंतमेवाधिकृत्य प्रमाणमित्यर्थः २१ स्वर्गादिभिः किं मे कार्यमिति श्रा
युक्तं अथ इहलोके चापि कार्यं नास्तीत्याह अहो जनेति अहो आश्चर्यं जनसमूहेपि अरण्यमिव संवृत्तं संजा

शरीरं स्वर्गनरकौ बंधमोक्षौ भयं तथा कल्पनामात्रमेवैतत् किं मे कार्यं चिदात्मनः २१ ॥
अहो जनसमूहेपि न द्वैतं पश्यतो मम अरण्यमिव संवृत्तं क्व रतिं करवाण्यहं कि २१ ॥ कस्मिन्
नाहं देहो न मे देहो जीवो नाहमहं हि चित् अयमेव हि मे बंध आसीद्या जीविते स्पृहा १२२ ॥ ०४

न तस्मादहं मिथ्या तन्न क्व रतिं प्रीतिं करवाणि न क्वापीत्यर्थः २१ ननु शरीरस्याहं ममतास्पदत्वेनानुरागविष
यत्वादहंकारस्याप्यहंतास्पदत्वेनानुरागविषयत्वात्तत्र स्पृहा स्यादित्याशंक्याह नाहमिति देहोहं न जडत्वात्ना
पि मे देहो मम निःसंगत्वात् जीवोहंकारो नाहं कर्तृत्वात् आत्मनश्चाकर्तृत्वात्कस्तर्हि त्वमित्याशंक्याह अहं चिदि
ति चित्स्वरूप एवाहमित्यर्थः ऊ तर्हि विवेकिनामपि जीविते स्पृहेत्याशंक्याह अयमेव हीति या जीविते
स्पृहा अयमेव मे बंधः आसीत् जीवनार्थं हि पुमान् स्ववर्णाहरणादिकमपि करोतीति जीविते स्पृहैव बंधो बं
धहेतुत्वात् इदानीं तु सच्चिदानंदानुभवशालिनो मम असंगस्य शरणानुषंगबंधनरूपे जीविते स्पृहा नास्तीम

ग्र. ८

नन्वयं द्वैतप्रपञ्चाध्यासः किंनिमित्तः किमुपादानकश्चेत्याशंक्याह बोधेति बोधमात्रश्चिदेकस्वरूपोऽहमेव पा॰
मार्थिको मया सर्वोपादानभूतेन कर्त्राऽज्ञानादविद्यालक्षणोऽज्ञानरूपान्निमित्तादहंकारममत्वोपाधिर्द्वैतप्रपञ्चः कल्पि
तः एवं विचारस्य फलमाह एवमिति एवं नित्यं विमृशतो विचारयतो मम निर्विकल्पे निरस्तद्वैते स्वस्वरूपचैतन्ये
स्थितिः प्राप्तिर्जाता ७ ननु स्वरूपचैतन्यप्राप्तिरूपा मुक्तिः प्रागुक्तविचारजन्या चेत्तदा मुक्तेर्विनाशापत्तिः
जन्यभावस्य विनाशित्वनियमात् विचाराजन्या चेत्तदा विचाररहितानामपि मोक्षापत्तिरित्याशंक्याह अहो
इति वस्तुतो मे मम बन्धो नास्ति न च मोक्षोऽस्ति नित्यचिद्रूपत्वात् तर्हि शास्त्रजन्यस्य विचारस्य किं फलमित्याश॰

बोधमात्रोऽहमज्ञानादुपाधिः कल्पितो मया एवं विमृशतो नित्यं निर्विकल्पे स्थितिर्मम ७ ॥
अहो मयि स्थितं विश्वं वस्तुतो न मयि स्थितं न मे बन्धोऽस्ति मोक्षो वा भ्रान्तिः शान्ता निराश्रया ८
सशरीरमिदं विश्वं न किंचिदिति निश्चितं शुद्धचिन्मात्र आत्मा च तत्कस्मिन्कल्पनाधुना ९

काश्रोति निर्दिष्टं निरेव तत्फलमित्याह अहो मयीति अहो आश्चर्यं मयि स्थितमपि विश्वं वस्तुतः कालत्रयेऽपि मय्ये॰
व नास्थितमिति विचारतो भ्रान्तिरेव शान्ता न तु परमानन्दावाप्तिरेव तन्नित्यात्मनः सर्वदा परमानन्दरूपत्वात्
कीदृशी भ्रान्तिः निराश्रया उक्तविचारादज्ञानस्य नष्टत्वान्निर्मूलेत्यर्थः ८ नन्वधिष्ठानस्योपादानस्य सत्य
त्वात् मुक्तेष्वपि प्रपञ्चोदयः स्यादित्याशंक्याह सशरीरमिति सशरीरसहितमिदं विश्वं न किंचित् न सत्य
नाममात्रमिति निश्चितं नेह नानास्ति किंचनेति श्रुतेः आत्मा च चिन्मात्रः शुद्धो मायामलशून्यस्तत्तस्मात्का
रणात् अधुनाऽज्ञाननिवृत्तौ सत्यां कस्मिन् अधिष्ठाने विश्वकल्पना स्यात् न कस्मिन्नपीत्यर्थः ९ ॥ ।८

ननु संबंधस्य न जगद्विधारकत्वं संबंधस्यैव पित्रादेर्गृहादिधारकत्वादित्याशंक्याह अहो अहमिति अहो आश्चर्यरू
पोऽहं तस्मै मे नमः यस्य मे सर्वमपि परमार्थतया किंचन किमपि नास्ति परमार्थमनो द्वितीयस्यैवाभावात् अथ
वा यद्वाङ्मनसगोचरं तत्सर्वं यस्य मम मम संबंधि मिथ्यातादात्म्यसंबंधः स्वर्णकुंडलादिवदित्यर्थः अत एव स
र्वसंबंधिना सर्वसंबंधिनात्मस्वरूपाय मे मह्यं नमस्त्वित्यर्थः १४ ननु त्रिपुटीरूपसंसारस्य पारमार्थिकत्वा
त्कथं मिथ्यातादात्म्यसंबंधो जगदात्मनोरित्याशंक्याह ज्ञानमिति ज्ञानं ज्ञेयं तथा ज्ञाता इत्यादिकं त्रित
यं त्रिपुटीरूपं सर्वं वास्तवं पारमार्थिकं नास्ति यत्र मयि इदं त्रितयं अज्ञानादनिर्वचनीयाज्ञानान्मिथ्याता॰

अहो अहं नमो मह्यं यस्य मे नास्ति किंचन अथवा यस्य मे सर्वं यद्वाङ्मनसगोचरं १४

ज्ञानं ज्ञेयं तथा ज्ञाता त्रितयं नास्ति वास्तवं अज्ञानाद्भाति यत्रेदं सोऽहमस्मि निरंजनः १५

द्वैतमूलमहो दुःखं नान्यत्तस्यास्ति भेषजं दृश्यमेतन्मृषा सर्वमेकोऽहं चिद्रसोऽमलः १६ मिथ्या

दात्मनाध्यस्तं भाति अत एव वस्तुगत्याहं निरंजनः प्रपंचमलसंबंधशून्योऽस्मीत्यर्थः १५ ननु निरंजनस्य कथं
दुःखसंबंध इत्याशंक्याह द्वैतभ्रांतिमूलक एवासौ न तु वास्तव इत्याह द्वैतमूलमिति अहो आश्चर्यं निरंजनस्या
प्यात्मनो द्वैतमूलं दुःखं द्वैतभ्रमोत्थो दुःखाध्यासो न तु वास्तवं दुःखमित्यर्थः दुःखाध्यासमहाव्याधेः किं भे
षजमित्याशंक्याह नान्यदिति अमलो मायातत्कार्यातीतश्चिद्रूपश्चिन्मात्रस्वरूप एकोऽहमित्येतत्प्रती
यमानं सर्वं दृश्यमानं जगज्ज्ञातं मृषा मिथ्याभूतं न पारमार्थिकमिति बोधादन्यत्तस्य त्रिविधदुःख॰
आधेर्भेषजं नास्तीत्यर्थः १६ ॥

अ॰
२
टि॰

ननु ब्रह्मत्वे जगदुपादानकारणत्वे तर्हि तस्य विकारित्वान्मृदादिवद्विनाशित्वापत्तिरित्याशंक्याह अहो अहमि-
ति अहो आश्चर्यरूपोऽहं यस्य मम सर्वोपादानभूतस्यापि विनाशो मम नास्ति न चोपादानत्वे सुवर्णादिवद्वि-
नाशित्वापत्तेः सुवर्णादिवद्विकारित्वानंगीकारात् विवर्ताधिष्ठानत्वेनैवोपादानत्वस्वीकारात् अत एवा-
शेषकार्योपादानत्वादविनाशित्वेन सर्वोत्कृष्टाय मह्यं नमः ब्रह्मादिदेवतामूलयाविनाशशंकां निराकरो-
ति ब्रह्मादीति ब्रह्मादिस्तंबपर्यंतं यज्जगत्तस्य नाशेऽपि तिष्ठतः प्रलयेऽपि स्थितिमतो यस्य मे नाशो ना-
स्तीत्यर्थः समस्तानमनंतब्रह्मेति श्रुतेः ११ नन्वात्मा सखंडः स्वावच्छेदकदेहवत्त्वान्नानागतवत्तथाहं

अहो अहं नमो मह्यं विनाशो यस्य नास्ति मे ब्रह्मादिस्तंबपर्यंतं जगन्नाशेऽपि तिष्ठतः ११ ॥
अहो अहं नमो मह्यमेकोऽहं देहवानपि क्वचिन्न गंता नागंता व्याप्य विश्वमवस्थितः १२ ॥
अहो अहं नमो मह्यं दक्षो नास्तीति मत्समः असंस्पृश्य शरीरेण येन विश्वं चिरं धृतं १३ ॥

कायरूपत्वाद्देहगमनागमनवानित्याशंक्याह अहोऽहमिति अहो आश्चर्यरूपोऽहं आश्चर्यरूपाय मह्यं नमः आ-
श्चर्यरूपत्वमेवाह एकोऽहमिति नानास्वखंडः स्वावच्छेदकदेहवानप्यहमेक एव यथा नानास्थकोपनि-
क्षिप्तत्वावच्छेदकजलोपाधिस्थितः परिच्छिन्नाहंकारावलक्षणोऽहंकारविदपि न गंता नागंतापि नागंता
चेत्यर्थः १२ नन्वात्मनो निःसंगः शरीरसंसर्गित्वाज्जगतस्तद्विधारकत्वादित्याशंक्याह अहो अ-
हमिति प्रथमपदार्थः पूर्ववदिति कारणात् मत्समो दक्षः असंभाव्यकार्यविधानचतुरः कोऽपि ना-
स्ति येन देहेन नाशरीरेणासंस्पृश्यस्पृष्ट्वा त्वपिंडेनोल्लुकवदसंबंधेनैव चिरं बहुकालं विश्वं स्थावरजंगमं मम

नन्वात्मनोऽज्ञाने सति आत्मप्रकाशाभावाज्जगत्कथमाभासते इत्याशंक्य स्वरूपचैतन्यबलादेवेत्याह
प्रकाश इति प्रकाशो निजबोधो मम निजं स्वाभाविकं स्वरूपमहं ततः प्रकाशादतिरिक्तो भिन्नो ना
स्मि अतो मम यदा विश्वप्रकाशनं तदाहं भासो मदात्मकप्रकाशादेव भासते स्वरूपचैतन्यं चेज्ञासक
तदा कथमज्ञानमिति चेत् सैवं नहि स्वरूपचैतन्यमज्ञानविरोधि किंतु ज्ञानसाधकमेव यथा जड
स्य सिद्धिर्वनस्यात् किंचात्मस्वरूपप्रकाशाभावे स्वात्मनोऽप्यसत्त्वप्रसक्तिः जगदान्ध्यप्रसंगश्च न
स्याद्यदा विश्वप्रकाशनं तदात्मस्वरूपप्रकाशादेवमर्थः ८ स्वप्रकाशेऽपि मय्यात्मनि अज्ञानवशा

प्रकाशो मे निजं रूपं नातिरिक्तोऽस्म्यहं ततः यदा प्रकाशते विश्वं तदाहं भास एव हि ८ ॥

अहो विकल्पितं विश्वमज्ञानान्मयि भासते रूप्यं शुक्तौ फणी रज्जौ वारि सूर्यकरे यथा ९

मत्तो विनिर्गतं विश्वं मय्येव लयमेष्यति मृदि कुम्भो जले वीचिः कनके कटकं यथा १० ॥

द्विश्वं भासते इति महदाश्चर्यं तद्दृष्टान्तमाह अहो इति स्वप्रकाशेऽपि मय्यपि अज्ञानादिकल्पितं रचितम
मय्येव विश्वं मयि भासते अहो आश्चर्यमिदं यथा शुक्त्यादौ रूप्यादिकं भासते तद्वदित्यर्थः ९ ननु माया
या विकारित्वात्तत्रैव विश्वमुत्पद्यते तत्रैव विलयमेति न तु चैतन्यात्मनीति शंकामपाकर्तुमाह
मत्तो विनिर्गतमिति इदं विश्वं मत्त एव विनिर्गतं मय्येव लयमेष्यति प्राप्स्यति यथा मृदादौ कुंभादि
स्तद्वदित्यर्थः न चात्र प्रमाणाभाव इति शंकनीयं यतो वा इमानि भूतानि जायन्ते येन जातानि जीव
न्ति यत्प्रयन्त्यभिसंविशन्तीति श्रुतेः १० ॥ रामाय नमः ॥ ॥

सशरीरं विश्वस्य पृथक्त्वं तयापरिमजनं सदृष्टान्तेन निरूपयति यथेति यथा तरंगाः फेनबुद्बुदाश्च तोयतो भिन्नाः सन्ति
(नित्यसंबंधः) पादानत्वात् तथात्मविनिर्गतं आत्मनः संजातं आत्मोपादानकं विश्वं आत्मनो न भिन्नं एवं वतोयतरंगादिषु जलं यथा
तत्कुमनुगतं तथा सच्चिद्रूपो हि विश्वस्मिन्नधिष्ठानभूतो न सन्नाम हि विश्वमित्यर्थः ४ सदृष्टान्तरेणात्मरूपतया स
र्वं लोकनं निरूपयति तन्तुमात्र इति स्थूलदृष्टान्तेन तन्तुवैलक्षण्येन प्रतीयमानोपि पटो विचारितो विचारवीक्षितः
सन् यद्वत् यथा तन्तुमात्रो भवेदस्ति तद्वत् वेदः स्थूलदृष्ट्या अस्ति वैलक्षण्येनापि प्रतीयमानमिदं विश्वं पुनर्वा विचा
रितं सदात्मतन्मात्रमेव आत्मसत्तात्मकमेव तेन तन्तुसमस्तं यापटो गतस्तथात्मापि समस्तं याधिष्ठानभूतो विश्वस्मि

यथा न तोयतो भिन्नास्तरंगाः फेनबुद्बुदाः । आत्मनो न तथा भिन्नं विश्वमात्मविनिर्गतं ४ तन्तु
(आत्मसत्ता या) मात्रो भवेदेव पटो यद्वद्विचारितः । आत्मतन्मात्रमेवेदं तद्वद्विश्वं विचारितं ५ यथैवेक्षुरसे
85 क्रमात्तेन व्याप्तैव शर्करा । तथा विश्वमयि ह्रूपं मया व्याप्तं निरंतरम् ६ ॥ आत्माज्ञाना
ज्जगद्भाति आत्मज्ञानान्न भासते । रज्ज्वज्ञानादहिर्भाति तज्ज्ञानाद्भासते नहि ७ ॥ ॥

त्वेनुगत इत्यर्थः ५ आत्मनैव सर्वव्याप्तमिति सदृष्टान्तरमाह यथैवेति यथैवेक्षुरसे क्रमात्प्रथमस्ताशर्करा
तेन मधुररसेन व्याप्तैव सर्वापि आप्तानत्वेवमयि नित्यानन्दस्वरूपे क्रमगमत्वमयानिमान्त्रेन निरंतरं वा
प्याप्तं व्याप्तं तस्माद्विश्वमानन्दात्मस्वरूपमेवेत्यर्थः नदेवमस्ति भाति प्रियमित्येवं रूपेणाहमेव सर्वत्रावस्थि
त इति श्लोकत्रयविवक्षितोर्थः ८ विश्वविदात्मनो न भिन्नं तर्हि केन प्रकारेणेदं विश्वं भासते केन च कारणे
न न भासते इत्याशंक्याह आत्माज्ञानादिति आत्मनोऽज्ञानात् जगद्भाति तथात्मनोधिष्ठानस्य ज्ञानान्न भा
सते अधिष्ठानाज्ञानादध्यासो भानेधिष्ठानज्ञानाद्वाभाने लोकप्रसिद्धं दृष्टान्तमाह रज्ज्वज्ञानादिति हि यथा र

अहो इति अहं इष्टमद्भुतमस्मादनुभवादहोऽस्माश्चर्ये अहं निरंजनः सर्वोपाधिविनिर्मुक्तः शान्तः सर्वविकारातीतः प्र
कृतेः परो मायाबाधकारस्सर्वांशस्य बोधः स्वप्रकाशः चिद्रूप इत्यर्थः गुरूपकाराख्यापनाय मोहविडम्बनमनुस
रति एतावन्तमिति एतावन्तं गुरूपदेशावधिकं कालं मोहेन देहात्माविवेकेन विडम्बित एव सांप्रतं तु श्री
गुरुप्रसादादात्मानन्दानुभवोऽस्मीति विवक्षितोऽर्थः १ सर्वकालीनमोहविडम्बनमुक्त्वा संप्रति गुरुप्रसादान्मम
देहात्मविवेकोऽजनीति सोपपत्तिकमाह यथेति अहं यथा जगत्प्रकाशयामि तथैवैनं स्थूलदेहं प्रकाशया
मि तथा च देहात्मनोः प्रकाश्यत्वात् जगत्तुल्यत्वमित्यर्थः कस्तर्हि जगदादिदेहात्मनोः संबन्ध इत्याशंकायामाहाते

अहो निरंजनः शान्तो बोधोऽहं प्रकृतेः परः एतावन्तमहं कालं मोहेनैव विडम्बितः १ ॥ यथा
प्रकाशयाम्येको देहमेनं तथा जगत् अतो मम जगत्सर्वमथवा न च किंचन २ ॥ सश
रीरमहो विश्वं परित्यज्य मयाधुना कुतश्चित्कौशलादेव परमात्मा विलोक्यते ३ ॥

विचारोऽयं ध्यासिकः संबन्धः परमार्थतस्तावन्न कश्चित्संबन्धः कुत इत्यादिविदमाह अतो ममेति अतोऽह
प्रकाशत्वात्सर्वं देहप्रभृति जगत् मम मदीयमध्यस्तमित्यर्थः बोधावधारणे अथवा परमार्थविचारे किंचन कि
मपि देहादिकं मम न चैव मध्यस्तमित्यर्थः तदेवमध्यारोपापवादाभ्यां सङ्केतः परो बोधोऽहमित्येवात्र स्फु
टीकृतं २ ननु लिंगदेहात्कारणदेहाच्च विवेकाभावे कथं प्रकृतेः परिक्रामात्मबोध इत्याशंकां ततोऽपि वि
वेकजमात्मानुभवमाह सशरीरमिति अहो आश्चर्यं सशरीरं लिंगशरीरं कारणसहितं विश्वं परित्य
ज्य विचारतः पृथक्कृत्य निषिध्य कुतश्चिच्छास्त्राचार्योपदेशलब्धात्कौशलाच्चातुर्यादेव परमः श्रे

अथ वर्णाश्रमधर्मकस्थूलशरीरात्तथा प्राणधर्मकलिंगशरीराद्भिन्नत्वेन परिशुद्धं चैतन्यमद्वष्टान्तेन
निरूपयति यथैवेति यथैवादर्शप्रतिबिम्बिते शरीरादावन्तर्मध्ये परितो बहिश्च स्वप्रत्यादर्शो व्याप्य
वर्तते तथैव साध्यस्तस्मिन्स्थूले शरीरे ऽन्तः परितश्च परमेश्वरश्चिदात्मा व्याप्य स्थितः तथा च
यत्र विश्वमिदं भाति कल्पितं रज्जुसर्पवदित्यादि सर्वोपि प्रकरणार्थः संक्षेपतः सूचितः ९ आ
दर्शदृष्टान्ते परिच्छिन्नत्वादिभ्रमापत्तिः स्यादस्य शरीरान्तर्वर्तित्वे चेत्समष्टिमतो घटाकाशदृष्टान्ते
न वाह्याभ्यन्तरव्यापकत्वमाह एकं सर्वगतमिति यथा सर्वगतमेकं नित्यं व्योम घटपदादौ व॰

यथैवादर्शमध्यस्थे रूपेऽन्तः परितस्तु सः तथैवास्मिन्शरीरेऽन्तः परितः परमेश्वरः ९ ॥
एकं सर्वगतं व्योम बहिरन्तर्यथा घटे नित्यं निरन्तरं ब्रह्म सर्वभूतगणे तथा १० इति प्र ॥ प्रथमप्रकरणं १

हिरन्तश्च वर्तते तथा नित्यमविनाशी ब्रह्म सर्वभूतगणे बहिरन्तश्च निरन्तरं सर्वदा वर्तत इत्यर्थः ५
ष तत्रात्मा सर्वस्यान्तर इति श्रुतेः अतश्चैवाथाहमिति ज्ञानवैकुन्ने देहाद्यहंभावपाशनिष्कृत सुखी
भवेत्यर्थः १० इति श्रीमहेश्वरविरचितायामष्टावक्रटीकायामात्मानुभावोपदेशप्रकरणं प्र
थमं १ ॥ इत्थं गुरूक्तिपीयूषाह्लादानुभवमात्मनः आविष्कारमास्वर्यं शिष्यो निजगुरुं प्रति १
तावच्छिष्यश्चिद्रूपात्मानुभवमाविष्कुर्वन्नेव गुरूक्तेनोपकारानुपनायं प्राचीनसंस्कारवशात्त्वा॰

प्रतीयमानाः षडूर्मयः षड्भावविकारा यानवकृतास्त्वं तेन द्विलक्षण इत्याह निरपेक्ष इति हे शिष्य त्वं निरः
पेक्षः अशनापिपासादिषडूर्मिसंसर्गातीतः शीतातपौ शरीरस्य लोभमोहौ च चेतसः प्राणस्य
क्षुत्पिपासे तत्षडूर्मिरहितः शिवः तथा निर्विकारः जायते अस्ति विवर्धते विपरिणमते अपक्षीय
ते नश्यतीत्येवंविधा यास्कादिप्रोक्ताः षड्भावविकारास्तत्संसर्गरहितस्त्वमित्यर्थः नहि कीदृशेना
हमित्यत आह निर्भर इति निर्भरः शुद्धचिद्घनरूपः आमुक्तिसमयमभिव्याप्य शान्ते तिष्ठतीत्याशयः अ
गाधास्तुतलस्पर्शा अपरिच्छिन्ना बुद्धिः स्वरूपं चैतन्यं ज्ञानरूपः अव्यक्तः अविद्याकृतक्षोभरहितस्त्वं च
निरपेक्षो निर्विकारो निर्भरः शीतलाशयः अगाधबुद्धिरक्षुब्धो भव चिन्मात्रवासनः १८ अ
थ संग्रहश्लोकः साकारमनृतं विद्धि निराकारं तु निश्चलं एतत्तत्त्वोपदेशेन न पुनर्भवसंभवः १
स्त्वतोऽसि अतस्त्वं क्रियामात्ररहितश्चिन्मात्रनिष्ठो भवेत्यर्थः १८ विषयान्विषवत्त्यजतः सत्यं पीयूषवद्भ
जेति मोक्षोपायः प्रथमश्लोके उपदिष्टः परं तु विषयाणां विषतुल्यत्वे सत्यात्मनः पीयूषतुल्यत्वे
च हेतुर्नोक्तः तत्र हेतुर्वक्तव्य एवानेन श्लोकोपदेशेनात्र हेतुः चिदात्मा चक्षुराद्यस्तविषयसम
न्ततो व्याप्य वस्थितोऽमृतरूपः स्वात्मस्थस्तु शरीरं इति तज्ज्ञानोपासनैरेव परमं पुरुषार्थं इति उपपादि
मुखेन प्रकरणार्थं संगृह्णाति साकारमिति अथ संग्रहश्लोक इत्यादिना हे शिष्य साकारं शरी
रादिकमनृतं मिथ्याभूतं विद्धि अनृतत्वं द्विधा व्यवहारेण तत्र्यः निराकारमात्मतत्त्वं निश्चलं कालत्र
यावस्थायि विद्धि सर्वस्मादेतस्मान्निखिलं विज्ञानमानंदं ब्रह्मेति निष्कृतेश्च अतएतत्तत्त्वं चिन्मात्रोपदेशे

अ॰
४

चित्तवृत्तिनिरोधरूपः समाधिरेव केवलो बंध निवृत्तिहेतुरिति निपातेन जलमतमपाकर्तुमाह निःसं
गइति हे शिष्य त्वं वस्तुतो निःसंगः सर्वसंबंधशून्योसि तथा क्रियारहितोसि अत्र हेतुमाह स्वप्रका
शो निरंजन इति निष्क्रियस्य समाध्यनुष्ठानं यत् अयमेव हि निश्चितं ते बंधः तथा च ज्ञानातिरिक्तो
पायानुष्ठानमात्रं ब्रह्मतत्वं बंध एवेत्यर्थः १४ तदेवमात्मज्ञानातिरिक्तः समाधिरपि पूर्वं निराकृतः
अथ पूर्णशुद्धबुद्धात्मनि विपरीतधियमुत्सारयन्नेव चित्तनिष्ठामपसंहरति श्लोकद्वयेन त्वयेति हे शि

निःसंगो निष्क्रियोसि त्वं स्वप्रकाशो निरंजनः अयमेव हि ते बंधः समाधिमनुतिष्ठसि १४ ॥
त्वया व्याप्तमिदं विश्वं त्वयि प्रोतं यथार्थतः शुद्धबुद्धस्वरूपस्त्वं मागमः क्षुद्रचित्तता १५ ॥

ष्य इदं विश्वं त्वया व्याप्तं कनकेनेव कटककुंडलादिकं तथा इदं विश्वं त्वयि प्रोतं मृदीव घटशरावादिकं
हे शिष्य त्वं यथार्थतः परमार्थतः शुद्धः अविद्यातत्कार्यसंकातीतः बुद्धः स्वप्रकाशः चिद्रूपोसि एवं
च सर्वगंधः सर्वरसो नेति नेतीति श्रुतिस्तु निर्दयानुसारे लोकाध्यारोपापवादाभ्यां निष्प्रपं
चं प्रपंचतात्मकं पूर्वात्मतत्वमुपदिष्टं भवति हे शिष्य परिपूर्णशुद्धबुद्धस्वरूपस्त्वं क्षुद्रचित्ततां वि ४
परीतचित्तवृत्तिं मागमः माकार्षीरित्यर्थः १५ ॥

इदं सत्स्वगतो भेदः पत्रपुष्पफलादिभिः। वृक्षान्तरात्सजातीयो विजातीयः शिलादितः॥ १

कशोकामपाकर्तुमाह आमेति आत्मा वध्यमान देहादौ तादात्म्य भ्रमा ४१

ननु जीवात्मनः पारमार्थिकाद्वैतबोधमोक्षादिविनिनार्कि संसारवानिव प्रतीयते नेनन्तवस्तुतः संसारी अत्र द
ष्टाहेतुनाह साक्षीति कर्तेरहंकारादेः साक्षी न तु कर्ता विभुः विविधभवमस्मादिति विभुः सर्वाधिष्ठानत्व
त्वाद्व्यापकः एकः सजातीयविजातीयस्वगतभेदरहितः मुक्तो वस्तुतो मायातत्कार्यातीतः चित्स्व
प्रकाशचैतन्यरूप अक्रियः चेष्टारहितः असंगः सर्वसंबंधशून्यः असंगो ह्ययं पुरुष इति श्रुतेः निःस्पृहः
विषयाभिलाषरहितः शान्तः प्रवृत्तिनिवृत्ति देहाद्यनः क्षोभरहितः तस्माद्वस्तुतो न संसारीमर्थः ११ अ
हं परिच्छिन्नो ममेदं देहादिकं सुखी दुःखी वाहमिति भ्रमस्यानादिपरंपरागतस्य सकृद्भावनया नैव

